त्रिकदर्शनम्

कुलपति - श्रीविद्यानिवासमिश्रप्ररोचनया
समलङ्कृतम्

प्रणेता
डा० रामचन्द्रद्विवेदी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

[illegible]स्मृति-ग्रन्थमाला
[द्वितीयं पुष्पम्]

त्रिकदर्शनम्

कुलपति-श्रीविद्यानिवासमिश्रप्रेरणया
समुपबृंहितम्

प्रणेता
डॉ० रामचन्द्रद्विवेदी
संस्कृतविभागाध्यक्षः
जयपुरस्थराजस्थानविश्वविद्यालयस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

ĀCĀRYABADARĪNĀTHAŚUKLA-SMṚTI-GRANTHAMĀLĀ
[Vol. 2]

TRIKADARŚANAM

FOREWORD BY

DR. VIDYA NIWAS MISRA

VICE-CHANCELLOR

BY

PROF. RĀMACANDRA DWIVEDĪ
Head, Department of Sanskrit
University of Rajasthan, Jaipur

VARANASI
1992

Research Publication Supervisor–
Director, Research Institute
Sampurnanand Sanskrit University
Varanasi.

■

Published by–
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

■

Available at–
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

■

First Edition–500 Copies
Price Rs. 100-00

■

Printed by–
Ratna Printing Works
B. 21/42 A, Kamachha,
Varanasi-221 010.

आचार्यबदरीनाथशुक्लस्मृति-ग्रन्थमाला
[द्वितीयं पुष्पम्]

त्रिकदर्शनम्

कुलपति-श्रीविद्यानिवासमिश्रप्ररोचनया
समलङ्कृतम्

प्रणेता
प्रो. रामचन्द्रद्विवेदी
अधिष्ठाता, संस्कृताध्ययन-संकायः,
राजस्थानविश्वविद्यालयः
जयपुरम्

वाराणस्याम्

२०४९ तमे वैक्रमाब्दे   १९१४ तमे शकाब्दे   १९९२ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी ।

प्रकाशकः—
डॉ. हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१ ००२.

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१ ००२.

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम्— १००-०० रूप्यकाणि

मुद्रकः—
रत्ना प्रिंटिंग वर्क्स
बी. २१/४२ ए, कमच्छा,
वाराणसी-२२१ ०१०

प्ररोचना

परमपूज्यानां महीयसां **श्रीगुरुशरणानन्दस्वामिमहाभागानां** दाक्षिण्येन प्रवर्तितायाः **"आचार्यश्रीबदरीनाथशुक्लस्मृतिव्याख्यानमालायाः"** ऐषमो द्वितीय उपक्रमो जयपुरस्थ-विश्वविद्यालयसंस्कृतविभागाध्यक्षैः सुहृद्भिः **श्रीरामचन्द्रद्विवेदिमहोदयैः**रस्माकं स्नेहानुरोधवशात् **"त्रिकदर्शनम्"** इत्याख्येन व्याख्यानत्रयेण समपादि। अल्पेन कालेन तैर्व्याख्यानानि उपनिबद्धानि। एतदधुना प्रकाशमानीयत इति महते परितोषाय। त्रिकदर्शने **"आगमः"**, **"स्वातन्त्र्यम्"**, **"अद्वयम्"** इति त्रीण्यधिकरणान्यधिश्रित्य त्रीणि व्याख्यानानि प्रास्ताविषत। एषु व्याख्यानेषु काश्मीराख्यस्य प्रत्यभिज्ञापराभिधानस्य शैवाद्वैतदर्शनस्य मूलग्रन्थानां विशदं विवेचनम्, तदनु प्रकाशरूपस्य स्वतन्त्रस्य पदार्थस्य विवेचनम्, अन्ते च अद्वयविमर्शस्य विवेचनं क्रमेणैतद् भृशं न्यदर्शि। शैवाद्वैतदर्शनस्य हि शाक्ताद्वैतदर्शनस्य मूलं प्राचीना आगमाः। एषु बहवो लुप्ताः, केचन खण्डरूपेणावशिष्टाः, केचन ग्रन्थान्तरसमाविष्टत्वेन रक्षिताः।

काश्मीरदर्शनस्य प्रतिष्ठापकैः **श्रीमदभिनवगुप्तपादाचार्यैः** स्वकीये सङ्कलनात्मके **"तन्त्रालोके"** ग्रन्थे प्राचीनानामागमानाम् उद्धरणानि बाहुल्येनोपन्यस्तानि। काश्मीर-दर्शनस्यैवापरमभिधानं **"त्रिकदर्शनम्"** इति। शाक्ताद्वैतमिवेदमपि ऐन्द्रियस्य लोकस्य सार्थक्यं मनुते। सर्वाणि द्रव्याणि हव्यानि इति सिद्धान्तमुररीकृत्य साधनाप्रक्रियायां किञ्चिद्वैशिष्ट्यमानयति। सुहृद्वर्यैः श्रीद्विवेदिमहोदयैः ज्ञानपक्षविस्तरो विशदतया स्फुटीकृतः, साधनापक्ष इङ्गिततया एव। एकस्मिन्नेव ग्रन्थे त्रिकदर्शनस्य निखिलं ज्ञातव्यं वस्तु सुस्पष्टतया सुसङ्गततया च सङ्ग्रथितम्, इत्यस्य ग्रन्थस्य विशेषो महिमा। अपरोऽपि विशेषो य आह्लादयति चेतः। स यथा—परम्परया नैरन्तर्यम्, परस्परविरुद्धानां सिद्धान्तानां सङ्गतिः, प्रकाशविमर्शयोः निरूपणमिति सर्वं विमलया प्रतिभया साधितम्।

मन्ये, अयमुपक्रम आचार्यप्रवराणां **पण्डितश्रीबदरीनाथशुक्लमहानुभावानां** सारस्वतस्मृतेरनुरूपो भविष्यतीति।

अस्य ग्रन्थस्य शीघ्रप्रकाशने प्रकाशनाधिकारिणा **श्रीहरिश्चन्द्रमणित्रिपाठिना**, प्रकाशनविभागीयेक्ष्यशोधकेन **श्रीहरिवंशकुमारपाण्डेयेन** च भृशं प्रयतितम्। तदर्थं ताभ्यामाशीर्वचांसि। सुहृद्वर्यैः **श्रीरामचन्द्रद्विवेदिमहोदयैः** ईक्ष्यशोधनपरिशिष्टादि-निर्माणकर्मणि नियुक्तेन **श्रीसूर्यप्रकाशव्यासेन** प्रकामं परिश्रमोऽनुष्ठितः, तदर्थं तस्मै शुभाशीर्वचांसि। एवमेव रत्नायन्त्रालयसञ्चालकेन **श्रीविपुलशङ्कर-पण्ड्यामहोदयेन** शीघ्रं सौष्ठवपूर्णं मुद्रणकार्यं कृतम्, तदर्थं तं साधुवादेन संयोजयामि।

वाराणस्याम्
मातृनवम्याम्,
२०४९ वैक्रमाब्दे

विद्यानिवासमिश्रः
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

आमुखम्

काश्मीरशैवदर्शनत्वेन सम्प्रति प्रत्यभिज्ञायमानं त्रिकदर्शनं बौद्धवेदान्तादि-दर्शनान्तरविलक्षणस्य परमाद्वयस्य प्रतिपादकं प्रत्नमपि नातिप्रसिद्धं प्रस्थानम् । एतदेव दर्शनं तान्त्रिकसाधनाया विचारपद्धतेश्च प्रातिनिध्यं कुरुते, आगममूलां संस्कृतिं साक्षात्कुरुते, कालिदास-जयप्रसादप्रभृतीनां केषाञ्चन कवीनां रहस्यमुन्मीलयति, मध्यकालिकसन्त-साहित्य-सम्प्रदायानामाधारपीठं निर्मिमीते, रससिद्धान्तस्य दार्शनिकीमुपपत्तिं निबध्नाति । किं बहुना, सर्वस्यापि चैतन्यं स्वातन्त्र्यं माहेश्वर्यञ्चोद्घोषयति । ज्ञानेच्छाक्रियाशक्तित्रितयत्रिशूली सर्वः शिव एव । ज्ञानक्रिययोः प्रकाश-विमर्शात्मकयोर्नास्ति वैयधिकरण्यम् । स्वातन्त्र्यं चैतन्यस्य स्वभावः । प्रमा-प्रमाण-प्रमेय-त्रिपुटी प्रमातरि विश्रान्ता । प्रमाता च स्वात्मा स्वसंवेदनसिद्धः, आगमप्रसिद्धः कर्ता ज्ञाता चादिसिद्धः । न तस्य निषेधः सिद्धिर्वा ।

दर्शनं शुद्धविज्ञानाद्व्यतिरिच्यते । विज्ञानमपि संस्कृतिनिरपेक्षं न भवति; तद्वदपि दर्शनन्तु संस्कृतिसापेक्षमेव । तत्त्वतो दर्शनं सांस्कृतिकी निष्पत्तिर्न पुनः परीक्षणसहः इन्द्रियगोचरश्च वैज्ञानिकः प्रयोगः । विज्ञानमपि चिन्तनस्य परां भूमिमधिष्ठाय दर्शनस्वरूपं गृह्णाति । संस्कृतिर्हि विषयतया सह विषयिभावम्, इदन्तया सह अहन्तां, प्रमेयेन सह प्रमातारं, तर्केण सह भावनामनुपादाय न प्रवर्तते । तर्क एव श्रवणमनननिदिध्यासनैः पुनः पुनरनुसंधानेन भावना भवति । तयोरविरोधं, सम्पृक्तिं सौभ्रात्रं साहित्यञ्च संस्कृतिर्वितनोति । दर्शनस्य संस्कृतिमूलत्वात् संस्कृतेश्चाभिव्यक्तीनां दिक्कालाद्यवच्छिन्नत्वात्प्रतिप्रमातृनिष्ठत्वाच्च दार्शनिकप्रतिपत्तयः सांस्कृतिकप्रत्ययपरम्परामनुधावन्ति । तत एवैकस्मिन्नपि विषये भिन्नाः प्रतिपत्तयः स्वसम्प्रदायानुसारं तुल्यं प्रामाण्यं भजन्ते । नैकापि तासु सम्प्रदायसिद्धत्वात् स्वानुभवसिद्धत्वाच्च बाधिता भवति, न वा अप्रामाणिकीति प्रदर्शयितुं शक्यते । तत एव सर्वेषां दार्शनिकविकल्पानां समानं प्रामाण्यं स्वीकार्यम् । नैकस्यापरेणात्यन्तिक ऐकान्तिको वा बाधः । सर्वेषां सहावस्थानं भूमिकाभेदेनाधिकारिभेदेन प्रकल्पनीयम् । तत एवाहुः—**तद्भूमिका एव सर्वदर्शनस्थितयः** ।

व्याख्यानत्रयमत्र त्रिकदर्शनस्य प्रथमं वाङ्मयं प्रमाणमीमांसां तत्त्वमीमांसां च प्राधान्येन पुरस्कुरुते, तदनु स्वातन्त्र्येण सिद्धान्तं शिवाभासवादं प्रस्तौति, पर्यन्ते च शिवाद्वयवादेनोपसंहरति । नात्र साधना न्यरूपि । तदर्थमाकरग्रन्थाः साहित्यं दर्शनं साधनाञ्च विषयीकृत्य व्याख्यानत्रिकसङ्ग्रहरूपा मदीया **'काश्मीर की शैव परम्परा'** द्रष्टव्याः ।

भारतस्य स्वातन्त्र्योदयादारभ्य पञ्चवर्षपर्यन्तमन्तेवासिना मया काशिकराजकीय-संस्कृतमहाविद्यालये बाल्येऽधीतम् । तस्य वाराणसेयसम्पूर्णानन्दसंस्कृत-

विश्वविद्यालयत्वेन परिणतौ सत्यामप्यस्त्येव मे निरवच्छिन्नः कश्चन सम्बन्धः । स चाधुना बन्धुवर्य्याणां प्राच्यप्रतीच्यविविधविद्यास्थानानां सुगृहीतनामधेयानामाचार्य-**श्रीविद्यानिवासमिश्र**-महोदयानां व्याख्यानार्थमनुरोधेन नवतां विधत्ते । एतद्-व्याख्यानत्रयं तदनुग्रहस्य प्रेरणायाश्च फलम् । तानहं सप्रश्रयं प्रणमामि । यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव नैव मे' इति धिया प्रणतेन मया ग्रन्थोऽयं श्रीगुरुचरणकमलेषु समर्प्यते । **'त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये'** ।

यैर्मनीषिमूर्धन्यैरियं व्याख्यानत्रयी दिवसत्रयं धैर्येण श्रुता स्नेहातिशयाच्च प्रशंसिता ते प्रणतिततिभिः पूज्यन्ते । जयपुरस्थराजस्थानविश्वविद्यालयस्य दर्शनविभागे प्राध्यापकः **डॉ. राजेन्द्रप्रसादः शर्मा** तत्रैव संस्कृतविभागे प्राध्यापिका तन्त्रालोकप्रतिपादितकर्मकाण्डविषये कृतभूरिपरिश्रमा **डॉ. (श्रीमती) अग्रवालोपाह्वा वीना** च निबन्धानां हस्तलेखार्थं, संस्कृतविश्वविद्यालयस्याधिकारिणश्च ग्रन्थस्य मुद्रणार्थं प्रकाशनार्थं च मदीयं स्वान्तेन सम्भावितं कार्तज्ञ्यमर्हन्ति । सर्वं मुद्रणकार्यं साधयतोऽन्तेवासिनोऽपि दूरस्थस्य काशीहिन्दूविश्वविद्यालये बौद्धदर्शनमध्यापयतः शैवदर्शननिष्णातस्य **डॉ. सूर्यप्रकाशव्यासस्य** परिश्रमं आशिषा संभाव्यते । ग्रन्थेऽस्मिन् बहुत्र सन्धिनियमा विवक्षापेक्षिणः कृताः, कतिचन विषयाः पुनरुक्ताः, मूलग्रन्थाश्च बाहुल्येनोल्लिखिताः । सर्वमेतत् शास्त्रस्य सुखावबोधाय, स्फुटप्रतिपत्तये सौकर्याय च कृतम् । प्रमादानवधानताव्यवधानहेतोः प्रस्फुटन्तो दोषा दोषज्ञानामपि क्षमैकधनानां विदुषां दृष्टिं न कलुषयिष्यन्तीति द्रढीयान्मे प्रत्ययः ।

कुलपतीनां प्रेरणया प्रातःस्मरणीयानामाचार्य**श्रीबदरीनाथशुक्ल**महोदयानां स्मृतौ समायोजितासु व्याख्यानमालासु भारतीयदर्शनानां नवनवोन्मेषैः क्रियमाणं प्राज्ञं श्राद्धमिदं सारस्वतं जगदनृणं विधातुं सुकृतः पन्थाः । "तस्मै श्रीगुरवे नमः ।"

श्रावणी, 2049 वैक्रमे

रामचन्द्रद्विवेदी

क्रमः

●

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
काश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरत्सर्ववन्द्यत्वमाप ॥

—काश्मीरसंस्कृतग्रन्थावलौ प्रमुखे

श्रीकान्तिचन्द्रपाण्डेयाः शैवशास्त्रसदाशिवाः ।
जयन्ति गुरवस्तेभ्यः कृतिमेतां समर्पये ॥

आगमः

प्रभवो नियोज्यान्, गुरवः शिष्यान् अग्रजाश्चानुजान् सम्भावनागुणेन महत्सु कर्मसु नियोजयन्ति । परगुणपरमाणून् पर्वतीकुर्वन्तस्ते सन्तः स्नेहभरेण पात्रताम-विचार्य क्वचित् कदाचित्प्रवर्तन्ते । स्वशक्तिपातस्वातन्त्र्यं वा तत्र हेतुः । तत एवाहं ज्येष्ठैः श्रेष्ठैश्च विश्वविश्रुतयशोभिः श्रीविद्यानिवासमिश्रमहोदयैर्व्याख्यानार्थं प्रचोदितः । अहं च "यथा नियुक्तोऽस्मि तथा करोमि" । पुनश्च पुण्यश्लोकानां न्यायशास्त्रावताराणामपि सर्वतन्त्रस्वतन्त्राणां तर्ककर्कशधियामपि सुकुमारसाहिती-सौभाग्यशालिनां गुरुकल्पानां पण्डितप्रवरश्रीबदरीनाथशुक्लमहोदयानां पुण्यस्मरणे-नात्मानं पावयितुमयमनुत्तमोऽवसरः। "यस्य क्वापि गतिर्नास्ति तस्य वाराणसी गतिः।" अतोऽस्त्येवाकुशलस्य मन्दस्याज्ञस्य च मे पण्डितपुंगवैः सह तीर्थसेवनाधिकारः । अनयैव धियोपक्रान्तमिदं पूर्वसूरिभिर्मद्गुरुभिश्च दिग्दर्शितमिदं त्रिकदर्शनमार्गणम् ।

पाश्चात्यदर्शन-(फिलासफी-) शब्दार्थ-परिभावितचेतसो भारतीया विद्वांसः प्रायेण भावे प्रयुज्यमानं साक्षात्काररूपं दर्शनशब्दार्थमपास्य दृष्टिबिन्द्व्यात्मके करणार्थ एव दर्शनशब्दप्रवृत्तौ ल्युट्प्रत्ययं निमित्तीकुर्वन्ति । दर्शनं दृष्टिर्दर्शनं च साक्षात्कार इत्युभयार्थेऽप्यविरुद्धोऽयं दर्शनशब्दो भारतीयदर्शनपरम्परायां दृष्टिभेदेऽपि साक्षाद-परोक्षं किमपि तत्त्वमवगन्तुं निर्दिष्टैकप्रयोजनः प्रतिभाति । तत एव बुद्धबोधिसत्त्व-तीर्थङ्कर-सिद्ध-योगि-मुनि-स्थितप्रज्ञ-जीवन्मुक्त-परमहंस-गुरु-भागवतादीनां स्वरूपाणि निर्वाण-कैवल्य-तादात्म्य-सालोक्य-सायुज्य-सारूप्यापुनर्भवादिप्रतिपादकानि मोक्षवच-नानि दर्शनेषु स्वार्थं पुष्णन्ति । "ब्रह्मविद् ब्रह्मैव भवति" इति श्रुत्यन्तवाक्यं, 'समुद्रमापः प्रविशन्ति यद्वदि'ति गीतास्मृतिः, 'ऋजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इवेति महिम्नस्तवः, प्रकृतिहितपरिपालनपुरस्सरं सारस्वतोत्कर्षेण सह व्यक्तेरपुनर्भवावेदकं शाकुन्तलीयं भरतवाक्यं[1], 'यस्तु ध्वस्ताखिल-भवमलो भैरवीभावपूर्णः कृत्यं तस्य स्फुटतरमिदं लोककर्तव्यमात्र'[2]-मित्यादीनि दर्शनस्वारस्यसुभगानि वाक्यानि, अहिंसा-करुणा-मैत्री-लोक-संग्रह-प्रतिष्ठापकाश्च सिद्धान्ता दर्शनपरम्परायां स्वार्थं लभन्ते । तत्त्वजिज्ञासा निष्प्रयोजना बुद्धिविलासमात्रैकप्रयोजना वा माऽभूदित्यत एव जिज्ञासाशब्दं व्याचिख्यासन्तः शङ्कराचार्यभगवत्पादा ज्ञानेच्छाया अवगतिपर्यन्ततां निरधारयन् ।[3] आगमैकगम्यस्य शब्दप्रमाणकस्यातीन्द्रियस्यापि तत्त्वस्य कथं साक्षात्त्वमपरोक्षत्वञ्चाम्नातमिति पश्चात् प्रमाणमीमांसाप्रसङ्गेन यत्किञ्चित् प्रदर्शयिष्यते । पूर्वन्तु त्रिकदर्शनस्य परम्परां तदर्थं च परामृशामः ।

कुङ्कुम-केशर-काव्यानामुन्मेषैः सह काश्मीरेषून्मीलितान्यद्वैतप्रधानानि शैवशास्त्राणि क्रम-कुल-प्रत्यभिज्ञाशाखासु विभज्यन्ते । एतदेव शास्त्राणां त्रिकं त्रिकदर्शनं विवृणोति । स्पन्दशास्त्रमपि केचन पृथक्त्वेन परिगणयन्ति । एतानि च शैवशास्त्राणि **ब्रह्मयामल-देवीयामल-दीक्षोत्तर-कुलगह्वर-गमशास्त्र-सिद्धयोगीश्वरी-नामक-मालिनी-विजय-मातङ्ग-रत्नमाला-सारशासन-सिद्धिशासन-त्रिकशासन-त्रिशिरस-योग-सञ्चर-प्रमुखान्** सम्प्रति अनुपलब्धानागमशास्त्रग्रन्थान् प्राधान्येनोपजीवन्ति । उपलब्धेषु चागमग्रन्थेषु **मालिनीविजयोत्तरतन्त्र-स्वच्छन्दतन्त्र-परात्रिंशिका-नेत्रतन्त्र-मृगेन्द्रतन्त्र-विज्ञानभैरवादयः** प्राधान्यं भजन्ते । एत आगमग्रन्थाः ख्रिस्तीयतृतीयशताब्दतो न प्राग्भवा इत्यैतिह्यविदोऽभिप्रयन्ति । सर्वस्यापि ज्ञानमूलस्य निगमागमादिपदाभिधेयस्य परमकारणाद् महेश्वरादेव प्रभव इत्यस्ति प्रत्ययः पुराणविदाम् ।[4] विश्वगुरोरेव नानाभावार्थरूपिणी विमर्शशक्तिरागमरूपेण विजृम्भते ।[5] तत्रापि च शैवागमानां सर्वेभ्योऽप्यतिशायित्वमिति श्रद्दधत्यागमविदः । तथा हि–

समस्तशास्त्रकथितवस्तुवैविक्त्यदायिनः ।
शिवागमस्य सर्वेम्योऽप्यागमेभ्यो विशिष्टता ॥

(तन्त्रालोके-22.8-9)

भेदप्रधानेष्वष्टादशरुद्रागमेषु[6] भेदाभेदप्रधानेषु दश शैवागमेषु[7] अभेदप्रधानेषु च चतुःषष्टिसंख्यकेषु भैरवागमेषु[8] पराद्वैतप्रतिष्ठापक आगम एव परमां कोटिमाटीकते। तथा हि-

तस्मात्सम्पूर्णसम्बोधपराद्वैतप्रतिष्ठितम् ।
यः कुर्यात्सर्वतत्त्वार्थदर्शी स पर आगमः ॥

(तन्त्रालोकविवेके-35.17)

परमाद्वयप्रतिपादकञ्च त्रिकदर्शनम् । परमाद्वयोपदेशप्रतिपादकत्वाच्छिवसद्भावलाभैकफलं त्रिकशास्त्रं सर्वोत्तमं स्वीक्रियते । तदुक्तम्-

वेदाच्छैव ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्[9] ॥

(तन्त्रालोकविवेके-I पृ. 49)

अनेनैवाशयेनागमेषु श्रूयते-

वाममार्गाभिषिक्तोऽपि[10] दैशिकः परतत्त्ववित् ।
संस्कार्यो भैरवे सोऽपि कुले त्रिकेऽपि सः ॥

(तन्त्रालोकविवेके-I पृ. 49)

सर्वेषु शास्त्रेषु प्राणतया प्रतिष्ठितमिदं संविदद्वयमयं त्रिकशास्त्रम् । तदुक्तम्-

यथोर्ध्वाधरताभाक्सु देहाङ्गेषु विभेदिषु ।
एकं प्राणितमेवं स्यात् त्रिकं सर्वेषु शास्त्रतः ॥

(तन्त्रालोके-35.32, पृ. 3664)

तथा हि-

पुष्पे गन्धस्तिले तैलं देहे जीवो जलेऽमृतम् ।
यथा तथैव शास्त्राणां कुलमन्तःप्रतिष्ठितम् ॥

(तन्त्रालोके-35.34, पृ० 3664)

शक्तिपातस्य तारतम्यं विवृण्वानस्तन्त्रालोककृत् त्रिकार्थस्यैव परमोत्कृष्टत्वं प्रत्यपादयत् । तथा हि-

दक्षे मते कुले कौले षडर्धे हृदये ततः ।
उल्लङ्घनवशाद्वापि झटित्यक्रममेव वा ॥ **(तन्त्रालोके-13.301)**

सर्वेषामागमानां मूलमेक एव शैवागमस्तस्य चागमस्योपेयं त्रिकम् । तदेव च कुलमित्यप्यभिधीयते इति निगदमेव स्वकण्ठेनाह तन्त्रालोककारः-

तस्य यत्तत् परं प्राप्यं धाम तत्त्रिकशब्दितम् ।
सर्वाविभेदानुच्छेदात् तदेव कुलमुच्यते ॥

(तन्त्रालोके-25.31)

विकल्पसंस्कारेण क्रमेण मोक्षं प्रतिपादयत् कालीनय-देवीनय-महानय-अतिनय-महार्थदर्शन-औत्तराम्नाय-संज्ञाभिः प्रसिद्धं क्रमदर्शनमपि त्रिकदर्शनान्नात्यन्तं भिद्यते । तथा हि **महार्थमञ्जर्यां** (पृ० 99) महेश्वरानन्दः–"**अनेन श्रीमहार्थत्रिकदर्शनयोरन्योऽन्यं नात्यन्तं भेदप्रथेति व्याख्यातम्**" ।

कुलस्य क्रमनयसोदरत्वं विवेकानुसारं तन्त्रालोककृता स्वीकृतम् । प्रत्यभिज्ञाहृदयकारा आत्मतत्त्वविषये तान्त्रिकाणां कौलानां त्रिकदर्शनविदाञ्च भेदमेवं व्यवस्थापयन्ति-"**विश्वोत्तीर्णमात्मतत्त्वमिति तान्त्रिकाः । विश्वमयमिति कुलाद्याम्नायनिष्ठाः । विश्वोत्तीर्णं विश्वमयञ्चेति त्रिकादिदर्शनविदः**" ।

सत्स्वपि कुल-क्रम-स्पन्दशास्त्रवर्तिषु बहुष्वान्तरभेदेषु त्रिकदर्शनं काश्मीरशैवदर्शनत्वेन प्रत्यभिज्ञायते । तथा हि कुलं शाम्भवोपायमाश्रयते, क्रमश्च शाक्तोपायम् । त्रिकदर्शनं त्वनुपायमेव मोक्षोपायतया प्रतिपादयति । लिङ्गपूजादिविषये त्रिकदर्शनं कुलप्रक्रियाया भिद्यते । कुलप्रक्रियानुसारं लिङ्गपूजाया निषेधो विहितः । त्रिकदर्शने विधिर्निषेधो वा नोपादीयते ।[11] क्रमदर्शनानुसारं कालसङ्कर्षणीत्यपराभिधाना काली शिवो वा परम्पराद्वयानुसारं परमं तत्त्वम् । सर्वत्र परमतत्त्वस्य प्रकाशविमर्शात्मकत्वस्वीकारेण कुल-क्रम-स्पन्दादीनां परमाद्वयप्रतिपादकात् प्रत्यभिज्ञापर्यायात् त्रिकदर्शनान्नात्यन्तं भेदः । अत एव त्रिकशब्दस्याभिनवगुप्तपादैरशेषशैवशास्त्रार्थं प्रयोग इत्यस्मद्गुरवः ।[12]

किमिदं त्रिकम्, कथञ्च तद्व्युत्पाद्यते? अयं प्रश्नः प्राप्तावसरः। सिद्धा-नामक-मालिनीति पराभिख्यत्रिकप्राधान्यात्, शिवशक्तिसङ्घट्टरूपशिवशक्तिनररूपा-पराभिख्यस्य, परापरापरापरादेवीत्रयस्य त्रिविधस्यापि त्रिकस्याभिधानात्, अभेद-भेदाभेद-भेदरूपज्ञानत्रयस्याद्वयदृशा प्रतिपादनात्, अनुत्तर-आनन्द-इच्छा-ईशान-उन्मेष-ऊनताख्यशक्तिसु षडर्धस्य अनुत्तर-इच्छा-उन्मेषाख्यस्य चिदिच्छाज्ञानात्मकस्य प्राधान्याङ्गीकाराच्च त्रिकाशब्दप्रवृत्तिः।[13] सोमानन्द-उत्पल-लक्ष्मणगुप्तोपज्ञत्वात् कुल-क्रम-प्रत्यभिज्ञाभेदत्रयजीवितत्वादपि त्रिकशब्दप्रवृत्तिः साम्प्रतमुत्प्रेक्षितुं शक्यते। त्रिकशब्दः "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु" इति **पाणिनिसूत्रेण** (5.1.58) त्रिशब्दात् संघार्थे कन्प्रत्ययेन व्युत्पाद्यते। विमर्शशक्तिभूतया पराप्रतिभारुपिण्या तृतीयशक्त्या शिवस्य ग्रहणं ज्ञानं वेत्यर्थमुपादाय "तावतीत्थं ग्रहणमिति लुग्वा" इति सूत्रेण (5.2.77) तृतीये तीयलोपे सति कन्प्रत्ययेन त्रिकशब्दनिष्पत्तिः। "त्रयोंऽशा-यस्येति" विग्रहे त्रिशब्दे कन्प्रत्ययेन "सोऽस्यांशवसन् भृतयः" इति सूत्रेणापि (5.1.66) त्रिकशब्दव्याकरणम्। अनुत्तरा-इच्छा-उन्मेषाश्च तिस्रः शक्तय एवाऽत्रांशत्वेनोपादेयाः। अंशशब्दप्रयोगेऽपि नात्रांशांशिभावः परिकल्पनीयः, शक्तीनां शक्तिमतोऽभेदादुपचरित एवायं शब्दः।

आगममूलं हि त्रिकदर्शनम्। वसुगुप्तः (नवमशताब्द्याः प्रारम्भे) यानि **शिवसूत्राणि** स्वप्ने महादेवकपर्वतशिलातो वाऽधिजगाम, तान्यपि आगमकल्पान्येव। तस्य शिष्यो भट्टकल्लटः, **स्पन्दकारिकायां** जगदुन्मेषनिमेषहेतुभूतामहंविमर्शरूपां ज्ञातृत्वकर्तृत्वरूपां चमत्कार-उच्छलता-ऊर्मिमत्स्योदरीपर्यायां स्पन्दशक्तिं विवेचयामास। तदनु सोमानन्दः (नवमशताब्द्या अन्तिमे भागे) त्रिकदर्शनस्य साङ्गोपाङ्ग-विवेचिकां **शिवदृष्टिं** सप्तस्वाह्निकेषु प्रणिनाय। अत्र स्वसिद्धान्तविवेचनपुरस्सरं दर्शनान्तराभिमतवादानां खण्डनं कृतम्। तथा हि भर्तृहरेर्व्याकरणदर्शनं शिवाद्वय-विरोधीन्येकविंशतिमतानि शाक्तवादादिकञ्च साटोपं खण्डितम्। प्रतिपादितञ्च—

आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्वपुः।
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः॥[14] **(शिवदृष्टौ—1.2)**

सोमानन्दस्य शिष्य उत्पलदेवः **ईश्वरप्रत्यभिज्ञाकारिकां तद्वृत्तिं विवृत्तिञ्च** प्रणीय प्रत्यभिज्ञापरपर्यायं त्रिकदर्शनं शास्त्रार्थपरिशीलनपुरस्सरं दर्शनान्तरखण्डनमण्डना-दिना परमां प्रतिष्ठामनैषीत्। तस्य **सिद्धित्रयी-शिवस्तोत्रावली**-ग्रन्थद्वयं प्रकाशितचरम्। अन्येऽपि केचन ग्रन्थास्तदीया आसन्, इत्यभिनवगुप्तकृतोद्धरणैर्ज्ञातुं शक्यते। अभिनवगुप्तपादाचार्याः (दशमशताब्दीकाः) ध्वन्यालोकस्य **लोचनटीकया**, नाट्य-शास्त्रस्य च **अभिवनभारत्या**ऽऽगमेतरपाठकेष्वपि सुप्रसिद्धाः। तस्य चत्वारिंशदधिकेषु ग्रन्थेषु विश्वकोषात्मकस्**तन्त्रालोकः** समस्तागमोपनिषद्विवेचनपरः, यस्य सारः स्वयमेव **तन्त्रसारे** प्रकटितः। त्रिकदर्शनप्रचारार्थं लिखितेषु लघुग्रन्थेषु स्तोत्रेषु च **परमार्थसारः बोधपञ्चदशिका परमार्थचर्चा परमार्थद्वादशिका महोपदेशविंशतिकं भैरवस्तव-**

क्रमस्तोत्र-अनुत्तराष्टिका-अनुभवनिवेदनस्तोत्र-देहस्थदेवतास्तोत्राणि च विशेषोल्लेखमर्हन्ति। एतेषु अनुत्तरस्य परमार्थस्य विश्वोत्तीर्णस्य विश्वमयस्य च स्वरूपाणि प्रकटितानि, यैः सह विश्वस्य तादात्म्यं निरन्तरमाभाति । तस्य टीकाग्रन्थेषु **ईश्वरप्रत्यभिज्ञाया विमर्शिनी विवृतिविमर्शिनीति**टीकाद्वयं, त्रिकसूत्रतया ख्यातायाः **परात्रीशिकायाः विवरणं शिवदृष्ट्यालोचनं**[15] (अनुपलब्धम्) प्राचीनस्य **क्रमस्तोत्रस्य क्रमकेलिनाम्नी** टीका (अनुपलब्धा) **भगवद्गीतार्थसङ्ग्रहश्च** सुप्रसिद्धाः । तस्य शिष्येषु क्षेमराजस्य (एकादशशताब्दीकस्य) **प्रत्यभिज्ञाहृदयं** सुविश्रुतम् । **पराप्रवेशिका बोधविलासश्च** बालावबोधाय तेन प्रणीतं ग्रन्थद्वयम् । तस्य टीकाग्रन्थेषु **शिवसूत्रविमर्शिनी, स्पन्दसंदोहः, स्पन्दनिर्णयः, स्तवचिन्तामणिविवृतिः, विज्ञानभैरवोद्योतः** (खण्डितः), **नेत्रतन्त्रोद्योतः, शिवस्तोत्रावलीटीका, साम्बपञ्चाशिकाटीका**दयः सुप्रसिद्धाः । तस्य शिष्यो योगराजः परमार्थसारस्य टीकां व्यधात् । अभिनवगुप्तस्य केरलीयशिष्यो मधुराजः (एकादशशताब्द्याः प्रारम्भे) **गुरुनाथपरामर्शनाम्ना** ग्रन्थेन त्रिकदर्शनं केरलेषु प्रचारयामास । तत्पुत्रो वरदराजः क्षेमराजशिष्यः शिवसूत्रस्य **वार्त्तिकं** प्रणिनाय **तन्त्रालोकस्य** विवेकटीकाकारो **वामकेश्वरमत**स्य च **टीका**कारो जयरथः, **महार्थमञ्जरीकर्ता** महेश्वरानन्दः, **महानयप्रकाशकृत्** क्षितिकण्ठश्च द्वादशशताब्द्यां काश्मीरशैवदर्शनं (कुल-क्रम-त्रिकस्रोतोभिन्नं) वितेनुः । एतेषु **महार्थमञ्जरी** महाराष्ट्रियं प्राकृतं **महानयप्रकाशश्च** काश्मीरमपभ्रंशं निबध्नतः । अवरङ्गजीवस्य समकालिकः साहेबकौलः स्वकीये **देवीनामविलासे** वेदान्तस्य शिवाद्वैतस्य च समन्वयं निददर्श । **कल्पवृक्षप्रबन्धः, सच्चिदानन्दवल्ली, शिवजीवदशकं** तस्यैव कृतयः सन्ति । **विज्ञानभैरवस्य टीका**कारः शिवोपाध्यायः **ईश्वरप्रत्यभिज्ञाविमर्शिनी**टीकायाः **भास्कर्याः** प्रणेता भास्करकण्ठः सप्तदशशताब्द्यां शैवशास्त्रपरम्परां विकासयामासतुः । शिवोपाध्यायस्य **श्रीविद्या**नाम-मौलिको ग्रन्थो **विज्ञानभैरव**स्योद्योतनाम्नी तट्टीका त्रिकदर्शनस्य शाङ्करवेदान्तेन समन्वयमवगाहेते । लल्लददनाम्ना प्रख्याता सर्वैः काश्मीराभिजनैरद्यापि बहुमान्या **लल्लेश्वरी** काश्मीरभाषानिबद्धैः स्ववचनैः (भास्करकण्ठेन लल्लेश्वरीवाक्यानीति नाम्ना संस्कृतैः) सूफ़ीमतेन सह त्रिकदर्शनस्य संवादेन साम्प्रतमपि काश्मीरेषु पण्डितैः प्राकृतैश्च सप्रश्रयं पूज्यते । अमृतवाग्भवाचार्याः **श्रीश्रीविंशतिकाशास्त्र-श्रीमहानुभव-शक्तिस्तवश्रीसिद्धमहारहस्यआत्मविलास-षट्त्रिंशत्स्तोत्रादि**रचनाभिः शास्त्रनिष्ठं स्वानुभवसिद्धञ्च त्रिकदर्शनरहस्यं संस्कृतेन विंशतिशताब्द्यां प्रकटीकुर्वन्ति तच्छिष्यस्य बलजिन्नाथ-पण्डितस्यामृतवाग्भवाचार्यकृतीनां टीकाः **स्वातन्त्र्यदर्पणाख्यो** मौलिको ग्रन्थः, निर्मीयमाणः **शैवदर्शनकोषः**, रामेश्वरझामहोदयस्य **पूर्णताप्रत्यभिज्ञाख्यो** ग्रन्थः, बहुभिर्विद्वद्भिर्बहुत्र प्रकाशिताः शोधलेखा इदानीमपि संस्कृतभाषया त्रिकदर्शनं प्रख्यापयन्ति । संस्कृतेन सहाऽऽङ्ग्लहिन्दीभाषादिषु च यैर्विद्वन्मूर्धन्यैः बहुकार्यं कृतम्, तेषु काश्मीर-ग्रन्थावलिसम्पादको मधुसूदनकौलः, महामहोपाध्यायो गोपीनाथ-कविराजमहोदयः, लक्ष्मणजूब्रह्मचारी, कान्तिचन्द्रपाण्डेयः सबहुमानमुल्लेखनीयाः

तेषामेव शिष्यपरम्परा देशे विदेशे च लब्धप्रसरा विराजते। दुर्वाससः शिष्येण त्र्यम्बकादित्येन प्रवर्तितमिदं[16] त्रैयम्बकं त्रिकविज्ञानमद्याऽपि स्वगुणगरिम्णा विश्वस्मिन् विश्वे राराजते।

अनवच्छिन्नप्रकाशः सततमवभासमानो नित्यप्रकाश आत्मा चित्-संवित्-महेश्वर-ब्रह्मपदाभिधेयः स्वस्वातन्त्र्येण प्रमातृ-प्रमेय-प्रमाण-प्रमितिचतुष्टयमाभासयति।[17] नास्ति संविदतिरिक्तं किञ्चिदपि। सैव स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति। चितिः स्वतन्त्रा विश्वसिद्धिहेतुरिति **प्रत्यभिज्ञाहृदयम्**। प्रमेयप्रमाण-प्रमितिप्रसरश्च प्रमातृसंलग्नतयैव निरवच्छिन्नं भाति। 'अहं जानामि, मया ज्ञातं, ज्ञास्यते च' इत्येवं स्वप्रकाशाहंपरामर्शपरिनिष्ठितमेवेदं ज्ञानं नाम।"[18] अन्यच्च **"तत्र ज्ञानं नाम स्वयंभेदिताभासभेदोपाश्रयनियन्त्रणासंकुचितम् 'अहमिति' संवेदनम्।"**[19] अन्तः-स्थितस्य भावजातस्य सृष्टिशक्त्या प्रमातृचतुष्टयरूपेणावभासितस्यापि दर्पण- नगर-न्यायेनान्योऽन्यं दर्पणाच्च पृथक् प्रतिभानेऽपि पूर्णहन्तापरामर्शरूपसंविदा सह सार्वदिकं सार्वकालिकञ्चैक्यम्।

परस्परमसंबद्धानां क्षणिकानां परस्परवार्तानभिज्ञानां ज्ञानानां पूर्वापरपरामर्श-रुपानुसंधानस्याभावे लोकव्यवहारो घटमहमज्ञासिषमित्यादिरूपो न सिध्यतीति ज्ञानानामनुसंधाता कश्चन नित्योऽभ्युपेय एव यत्र ज्ञातृज्ञेयावभासिका ज्ञानशक्तिः, पूर्वाभासितपदार्थानां पूर्वाभासितत्वेन कालान्तरे स्मृतिशक्तिः अन्तःस्थितस्यापि विश्ववैचित्र्यस्य बाह्यतया भेदबुद्धिरपोहनशक्तिर्वा स्यादत आहुः–

एवमन्योन्यभिन्नानामपरस्परवेदिनाम्।
ज्ञानानामनुसन्धानजन्मा नश्येज्जनस्थितिः॥
न चेदन्तःकृतानन्तविश्वरूपो महेश्वरः।
स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहनशक्तिमान्॥

(ईश्वरप्रत्यभिज्ञाकारिका–1.3.6-7)

एवं प्रकाशविमर्शात्मिका परा संविदन्तर्निर्मग्नभावराशिं बहिरुल्लास्य प्रमातृ-प्रमेय-प्रमाण-प्रमितिकोटिचतुष्टयमवभासयति। अवभासनकालेऽन्योन्यं संविदश्च पार्थक्येनानुभूयमाना अप्याभासाः संविद्रूपतां नातिवर्तन्ते। दर्पणन्यायेन च तस्यामेव प्रतिबिम्बितास्तिष्ठन्ति। प्रत्यवमर्शात्मकं चित्स्वातन्त्र्यमेव स्वमायाशक्त्या प्रमातृ-प्रमेयादिभेदमातनोति। तच्च चित्स्वातन्त्र्यमागमेषु परावाग्रूपतया पराप्रतिभारूपेण परादेवीस्वरूपेण चाऽभिमतम्।[20]

नवाभासरूपस्य प्रमाणस्य प्रवृत्तिर्न हि परमप्रमातरि महेश्वरे प्रवर्तते।[21] देहप्राणपुर्यष्टकशून्यप्राय एव प्रमातरि प्रमाणं प्रसरति। अत एवाहुः–

"सङ्कोचावभास एव च मायीय प्रमातुरूत्थानम्। अत एकया सृष्टिशक्त्या प्रमातृ-प्रमाण-प्रमेयोल्लासः परमार्थतः"

(ईश्वरप्रत्यभिज्ञाविमर्शिन्याम् 2.71)

सर्वेऽप्यात्मवादिनोऽद्वैतिन आत्मनश्चिद्रूपत्वं प्रकाशरूपत्वं ज्ञानरूपत्वं वा स्वीकुर्वन्ति । न तत्र किमपि वैशिष्ट्यं शिवाद्वैतवादिनाम् । नैयायिका ज्ञानमात्मनः स्वरूपं न स्वीकुर्वन्तस्तस्य गुणत्वमङ्गीकुर्वन्ति । सांख्याश्च चिद्रूपाज्ज्ञानस्य वैलक्षण्यं प्रतिपादयन्तस्तयोर्वैयधिकरण्यं व्यवस्थापयन्ति । त्रिकदार्शनिकाः शाङ्कराश्च न तथा प्रतिपद्यन्ते । ज्ञानस्य स्वप्रकाशतोभयसिद्धान्तसम्मता । परं वेदान्तिनो ज्ञानस्य विमर्शरूपत्वं स्वातन्त्र्यं कर्तृत्वं वा विकारभिया नैवोररीकुर्वन्ति । आगमिकास्तु ज्ञानस्य क्रियारूपत्वमामनन्ति । कर्तृत्वाभावे ज्ञानं चैतन्यं वा जडमेव सेत्स्यतीति तेषां राद्धान्तः ।

ज्ञानस्य वस्तुतन्त्रत्वं क्रियायाश्च पुरुषतन्त्रत्वं भगवता शङ्करेण शारीरकभाष्ये सावष्टम्भं प्रतिपादितम् ।[22] ज्ञानं स्वाभाविकः स्पन्दः, सहजा क्रिया विशिष्टकर्मविलक्षणा चेत्यागमविदः । अत एव ते ज्ञानकर्मणोरन्योऽन्यावियोगमुपदिशन्ति[23], क्रियायाश्च संविदभिन्नरूपतां प्रतिष्ठापयन्ति–

तस्मात् क्रियाऽपि या नाम ज्ञानमेव हि सा ततः ।
ज्ञानमेव विमोक्षाय युक्तं चैतदुदाहृतम् ॥

(तन्त्रालोके–1.155)

ज्ञानं न खलु जडस्य व्यापारः । घटपटादेर्दर्पणे संक्रान्तिर्न हि दर्पणे किञ्चिदपि ज्ञानमुत्पादयति । अचेतनस्याचेतनान्तरे प्रतिबिम्बनेन ज्ञानं नोत्पद्यते । अत एव ज्ञानस्य जडबुद्धिवृत्तितां व्यवस्थापयन्तोऽपि सांख्याश्चेतनोपरागमनिवार्यतया कल्पयन्ति । सर्वत्र ज्ञानव्यापारे प्रमातुर्विमर्श आवश्यकः । अयं विमर्शव्यापार एव सूक्ष्मां सहजां क्रियां शून्यताप्रायां प्रकटयति । पाणिनेः 'जानाति, करोति' इत्यादिषु सर्वत्र ज्ञानार्थकेषु करोत्यर्थकेषु च व्यापारेषु क्रिया सममेव सम्मता । 'ज्ञानं कथं प्रकाशते' अमुं प्रश्नं समाधातुं नैयायिका अनुव्यवसायात्मकं, ज्ञानानन्तरं जायमानं ज्ञानं, निर्णयन्ति । अनुव्यवसायस्वीकारे ज्ञानस्य विषयत्वापादनात् तस्यापि केनचिदन्येन ज्ञानान्तरेण भाव्यमित्यनवस्थाप्रसङ्ग आपतति । अतो ज्ञानस्य विषयव्यतिरिक्तत्वं प्रकाशरूपत्वं प्रमातृविश्रान्तत्वं चाद्वैतिनः स्वीकुर्वन्ति । विषयप्रकाशेन सह ज्ञानमपि स्वत एव विषयविलक्षणतया प्रकाशते । न हि ज्ञानं घट-नील-सुखादिरिव विषयतया प्रकाशते । शिवाद्वैतवादिनः शाङ्करवेदान्तिनश्च न्याय-सांख्यादिविलक्षणं ज्ञानस्वरूपं स्वीकुर्वन्तीति तात्पर्यम् । केवलं स्वप्रकाशस्य ज्ञानस्य विमर्शरूपतामादायैव तयोर्भेदः ।

भारतीयदर्शनेषु साकल्येन दश प्रमाणानि सन्ति । तेषु षट्प्रमाणवादिनो भाट्टाः, व्यवहारे भाट्टनयं प्रमापर्यन्तश्च वेदान्तिनः । त्रिकदर्शनविदां त्रिविधमेव प्रमाणमिष्टम्–आगमः प्रत्यक्षमनुमानञ्च तेष्वेव तेषामभिनिवेशो नान्येषां प्रमाणानां खण्डने मण्डने वा । तत्रापि आगम एव सकलप्रमाणमौलिभूतः । शब्दस्य प्रामाण्यं स्वीकुर्वत्सु दर्शनसम्प्रदायेषु त्रिकदर्शनस्यानितरसाधारणा दृष्टिः । तदेतदागमस्वरूपविमर्शेन स्फुटीभवति । अभिनवगुप्तः **श्रीतन्त्रालोकस्य** पञ्चत्रिंशाह्निके सर्वस्य

पुरातनस्य व्यवहारस्य प्रसिद्धिमूलकत्वं प्रसाध्य 'प्रसिद्धिरागमो लोके' इत्यागमलक्षणं प्रस्तूय प्रत्यक्षानुमानयोरपि तन्मूलकतां साधयामास–

अन्वयव्यतिरेकौ हि प्रसिद्धे रूपजीवकौ ।
स्वायत्तत्वे तयोर्व्यक्तिपूगे किं स्यात्तयोर्गतिः ॥
प्रत्यक्षमपि नेत्रात्मदीपार्थादिविशेषजम् ।
अपेक्षते तत्र मूले प्रसिद्धिं तां तथात्मिकाम् ॥

(तन्त्रालोके 35.2-4)

साध्यसाधनसम्बन्धस्याधिगमो न हि प्रतिव्यक्तिनियतः, नहि प्रत्येकं व्यक्तिः सम्बन्धं निर्धार्यैव प्रवर्तते, अतस्तदर्थं प्रसिद्धिरेवापेक्ष्यते । प्रसिद्ध्यभावाद् दहनान्वयव्यतिरेकानुवर्तिनि धूमे तद्विशेषा अविनाभावितयाऽनुसन्धातुं न शक्यन्ते । इन्द्रियादिसामग्रीजन्यं प्रत्यक्षमपि "ताद्रूप्यावमर्शमयीं सर्वव्यवहारनिबन्धनभूतां प्रसिद्धिमपेक्षते । तां विनेन्द्रियादिप्रेरणाभावे न किञ्चित् सिध्येत्" इति तत्रैव जयरथः।

अवगीतप्रसिद्धिरूपश्चागमश्चान्तरशब्दरूप एव प्रमातुर्विमर्शः । तथा हि–

प्रसिद्धिश्चाविगानोत्था प्रतीतिः शब्दनात्मिका ॥
मातुः स्वभावो यत्तस्यां शङ्कते नैष जातुचित् ।
स्वकृतत्ववशादेव सर्ववित्स हि शङ्करः ॥

(तन्त्रालोके 35.19-20)

परात्रीशिकाविवरणे (पृ. 14-15) परप्रमातृ-परिमितप्रमात्रोरैक्यमनुसंधायागमस्य स्वात्माभिन्नपरामर्शरूपतया स्वानुभवागमार्थयोरेकरसता सिद्धान्तिता ।

स्वात्मा सर्वभावस्वभावः स्वयं प्रकाशमानः स्वात्मानमेव स्वात्माविभिन्नेन प्रश्नप्रतिवचनात् प्रष्टृप्रतिवक्तृस्वात्ममयेनाऽहंतया चमत्कुर्वन् विमर्शति । एवं स्वात्मपरामर्श एवागमः । अत एव स्वानुभवः शास्त्रार्थं संवादयति । सामान्यजनस्य ज्ञानं संवृत्तिं व्यवहारमाभासं वा नातिवर्तते । सन्ति ऋषयो योगिनस्तीर्थङ्कराः स्थितप्रज्ञा बोधिसत्त्वाश्च ये प्रतिभैकगम्यमिन्द्रियागोचरमप्यर्थं साक्षात्कुर्वन्ति । तदपि दर्शनं लौकिकप्रत्यक्षवत् प्रामाणिकं चरितार्थञ्च विज्ञानम् । अतः साधनया साक्षात्कृतः 'शिवोऽहम्, अहं ब्रह्मास्मि, तत्त्वमसि' इत्यादयोऽनुभवा आङ्ग्ल-अमेरिकनदर्शनार्थपरम्परामङ्गीकृत्य नापलपनीयाः, न वा दर्शनक्षेत्राद् बहिष्करणीयाः ।[24] अनुभवानामभिव्यक्तीनाञ्च भेदाः देशकालभाषासंस्कृतिरूपभेदादधिकारिविषयसोपानादिभेदाच्च व्याख्यातुं सुलभाः । न तेन तेषामप्रामाण्यमुत्प्रेक्षामात्रपरत्वं वाऽवसेयम् । इन्द्रियगोचरविषयेष्वपि नानाबुद्धयो भवन्त्येव बुद्धिवादिनां पाश्चात्यानां पौरस्त्यानां वा । नीलान्यपि कुशल-शिल्पिभिः पीतानि क्रियन्ते, व्याख्यायन्ते वा ।

परप्रमातृविमर्शात्मकादेकस्मादागमाच्चाधिकारिविषयदेशकालप्रयोजनभेदादागमानां नानात्वम् । तद्वशादेव च तत्तदागमानां प्रामाण्यं न पुनर्नित्यत्वेनाविसंवादितया वा ।[25] तथा हि **जयरथः**–

त्रिकदर्शनम्

रामचन्द्रद्विवेदी

"प्रत्यक्षादावनित्यत्वेऽपि प्रामाण्यवर्णनात्, आकाशादौ नित्यत्वेऽपि तदसंभवात् । स्वर्गाग्निहोत्रवाक्यादावविसंवादादर्शनेऽपि प्रामाण्याभ्युपगमात्, अस्ति कूपे जलमित्यादौ कदाचिंद् दर्शनेऽपि प्रामाण्यानुपपतेः ।" (तन्त्रालोकविवेके 35.39)

न हीन्द्रियार्थसन्निकर्षेण प्रत्यक्षं जन्यते, तत्त्वे चैतन्याभावेऽपि प्रत्यक्षं जायेत । प्रत्यक्षमनुजायमानान्यनुमानोपमानादीनि प्रमाणानि प्रत्यक्षवदेव संविदायत्तानि । आगमश्च संवित्तिः । अतस्तदायत्तान्येव सर्वाणि प्रमाणानि । आगमस्यैव स्वतन्त्रं प्रामाण्यम् । अन्येषां तु तत्पारतन्त्र्यमेव । ज्ञानेन्द्रियाणि करणानि, अन्तःकरणमपि करणमेव । न खलु करणं कर्तृपदं लम्भयितुं शक्यम् । अतः प्रमातैव प्रमाणं साधयति न पुनरन्तःकरणादिकम् । अतः प्रमातृविश्रान्तं प्रमाणम् । परमश्च महेश्वर एव सर्वेषां प्रमाणानां प्रामाण्यं तनुते–

प्रमाणानि प्रमावेशे स्वबलाक्रमणक्रमात् ।
यस्य वक्त्रावलोकीनि प्रमेये तं स्तुमः शिवम् ॥
प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते ।
तेषामपि परो जीवः स एव परमेश्वरः ॥

(ईश्वरप्रत्यभिज्ञाविमर्शिन्याम्–2.2-3.)

स्वतन्त्रश्च प्रमाता करणनैरपेक्ष्येण ज्ञातुं प्रभवति । अत एव 'आ समन्तादर्थं गमयतामागमानामृषीणां[26] योगिनाञ्चातीतानागतविप्रकृष्टार्थप्रतिपत्तिः प्रमाणतयेष्यते।

प्रकाशविमर्शात्मिका संविदियं, कर्तृज्ञातृस्वरूपो महेश्वरो वा न खलु प्रमाणव्यापारसाध्यः । आदिसिद्धो हि सः । अत एवाहुरुत्पलाचार्याः–

कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे ।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः ॥

(ईश्वरप्रत्यभिज्ञाकारिका 1.1.1)

संविदः स्वसंवेदनसिद्धत्वमादिसिद्धत्वञ्च न केवलमागमिकाः, परं साङ्ख्या वेदान्तिन आर्हताः सर्वे चान्ये आत्मवादिनः स्वीकुर्वन्ति । अपरोक्षचिदात्मास्वीकारे, प्रत्यक्चैतन्यानभ्युपगमे सर्वस्याऽप्यप्रथनमसंवेदनं स्याज्जगदान्ध्यञ्च प्रसज्येत । चिदात्मनो निषेधोऽपि तमेव प्रत्याययति–

य एव निराकर्ता तस्यैवात्मत्वात् ।(शारीरकभाष्ये 1.1.4)

स्वतः प्रामाण्यवादिनस्तावत् त्रिकदार्शनिकाः । प्रामाण्यं यदि संवादप्रवृत्त्यात्मकत्वेनाऽर्थक्रियात्मकेन वा ज्ञानेन गृह्येत् तर्हि तस्यापि प्रामाण्यग्राहकस्य ज्ञानस्य ज्ञानान्तरेण प्रामाण्यं स्वीकार्यं भवेदित्यनवस्थादोषः प्रसज्येत् । पुनश्च प्रतिभासिकानां स्वप्ने दृष्टानामर्थानाञ्चाऽर्थक्रियाकारित्वं प्राप्यते, अतो न तेन प्रामाण्यनिर्वाहः । अर्थक्रियाभासश्चाभासान्तरमेवेति नार्थक्रियाकारित्वं भावानां सत्त्वम् । अतो बाधाभावे प्रामाण्यं स्वत एवेति समर्थनीयम् । अप्रामाण्यं तु बाधबलाद् भवति । बाध्यबाधकभावश्च ज्ञानानामेकप्रमातृनिष्ठतयैव समाधानं लभते । तदुक्तम्–

बाध्यबाधकभावोऽपि स्वात्मनिष्ठाविरोधिनाम् ।
ज्ञानानामुदियादेकप्रमातृपरिनिष्ठिते ॥

(ईश्वरप्रत्यभिज्ञाविमर्शिन्याम्–1.7.6)

प्रसिद्धं ख़लु ख्यातिपञ्चकं भ्रमस्वरूपनिरूपणविषये । त्रिकदार्शनिकाः पूर्णस्यापूर्णतया भानम्, अपूर्णख्यातिरख्यातिरेव वा भ्रान्तितत्त्वं मन्यन्ते ।[27] यत्र ज्ञेयस्य तत्त्वस्य सामस्त्येन प्रथनं न भवति, तदेवाज्ञानं तच्च भ्रममूलम्–

अतो ज्ञेयस्य तत्त्वस्य सामस्त्येनाप्रथात्मकम् ।
ज्ञानमेव तदज्ञानं शिवसूत्रेषु भाषितम् ॥

(तन्त्रालोके 1.26)

नेयं भ्रान्तिर्ग्रहण-स्मरण-विवेकाख्यातिरूपा यथा प्राभाकराणाम् । परमप्रमातुः पूर्णाहन्ताया वाऽनुभवो ज्ञानप्रक्रियया न सुलभः । तत्रायं विशेषः । बौद्धपौरुषभेदेन द्विविधं ज्ञानमज्ञानञ्च–बौद्धमज्ञानन्तु बौद्धज्ञानेन नाश्यते, त्रिविधमलरूपं पौरुषमज्ञानन्तु विकल्पादिसंस्कारद्वारा मोक्षोपायैश्च नश्यति । स्वात्मदेवस्य पूर्णताप्रथनार्थं मोहापसारणरूपाऽपूर्णाख्यात्यपसारिणी प्रत्यभिज्ञैव शरणं यदर्थमागमा अनुसन्धेयाः ।

अद्वयप्रतिपादिकानि काश्मीरशैवदर्शनानि क्रम-कुल-प्रत्यभिज्ञाख्यानि त्रीणि सन्ति, तदपि च त्रिकमेकमिति निवेदितमेव । तत्र क्रमदर्शने काली एव परं तत्त्वम्, तस्मादेवैतद्दर्शनं कालीनय इति नाम्ना प्रसिद्धिमाजगाम । काल्याश्च देवीरूपत्वाद्देवीनय इत्यस्यांभिधानान्तरम् । तन्त्रालोकविवेकटीकायां श्रीमता जयरथेन प्राचीनाचार्याणां श्लोकानुद्धरताऽयं कालीनयदेवीनयक्रमदर्शनाद्यभिधो महानयोऽतिनयश्चाप्युच्यते स्मेति सूच्यते ।[28] केषुचिदागमेषु शिवो वक्ताऽन्येषु च पार्वती भैरवी देवी वेत्यनुसन्धायागमदार्शनिकेषु परम्पराद्वयं प्रचचार । एकत्र शिवः, अपरत्र भैरवी देवी काली वा परं तत्त्वम् । नामभेदेऽपि परतत्त्वस्वरूपनिरूपणे न कश्चिदपि तात्त्विको भेदोऽवसेयः । यद्यपि सोमानन्दः काल्याः स्त्रीलिङ्गत्वेन "स्त्रीलिङ्गस्य पुल्लिङ्गविशेषरूपत्वम्" इति व्याकरणमतमनुसरन् शिव एव परं तत्त्वं शक्तिश्च तदाश्रितेति प्रतिपादयामास, परं महाशैवा अभिनवगुप्तपादा इमां युक्तिं न समर्थयन्ते । तैश्च तन्त्रालोके कालसङ्कर्षिणी-भैरवी-कालीप्रभृतिर्नामभिः परा संविदेंन भगवती परं तत्त्वमिति प्रत्यपादि । प्रकाशविमर्शस्वरूपेयं परा संविद् अन्तर्बाह्योभयात्मना स्वातन्त्र्येण परिस्फुरति । विभिन्नस्यापि भावौघस्य चिदात्मनैकीकारः ।[29] सा पारमार्थिकी संवित् सृष्टिस्थितिसंहारानाख्यत्वेन चतुर्विधरूपमाश्रित्य प्रमातरि प्रमाणे प्रमेये चाविच्छन्नत्वेनैकत्र चतुरात्म्येन द्वादशधा परिस्फुरति । अत एवास्या द्वादशरूपत्वमाचक्षते । आगमेऽपि–"द्वादशारावियोगेन देवीं द्वादशधा यजेत्" इति । अस्याः परत्वं व्याकुर्वाणाः श्रीमदभिनवगुप्तपादाः प्राहुः–

इमाः प्रागुक्तकलनास्तद्विसृम्भोच्यते यतः ।
श्रेयो ज्ञानं च संख्यानं गतिर्नाद इति क्रमात् ।

इति पञ्चविधामेनां कलनां कुर्वती परा।
देवी काली तथा कालकर्षिणी चेति कथ्यते ॥

(तन्त्रालोके 4.173;176)

कालीशब्दः कल क्षेपे, कल गतौ, कल संख्याने, कल शब्दे इति धातुचतुष्टयस्य पञ्चधार्थमनुधावन्निष्पद्यते, यतो गतिर्ज्ञाने प्राप्तौ च वर्तते। एवञ्च कालीकलनं नाम स्वात्मना बहिरूपासनं क्षेपो वा। भेदितस्य च भावजातस्य स्वात्माभेदेन परामर्शो ज्ञानम्, भेदितस्यैव प्रमातृप्रमेयादेरर्थस्य परस्परापोहनाद् इदमिदं नानिदमिति प्रतिनियततयाऽवस्थापनात् संख्यानं विकल्पः, गतिश्चात्र गत्युपसर्जना प्राप्तिः, तेन भेदितोऽर्थः संविल्लक्षणं स्वरूपमारोहति, एष च संवित्स्वरूपारोहो दर्पणप्रतिबिम्बन्यायेनाभ्युपगन्तव्यः। प्रतिबिम्बस्य हि तदव्यतिरिक्तत्वेऽपितद्-व्यतिरिक्ततयैवावभासो भवति। अविकल्पज्ञानादीनामपहस्तनपूर्वकं स्वात्मपरामर्श-लक्षणेन स्वरूपेणावस्थानं नादः। इमां पञ्चविधां कलनां कुर्वती कालकर्षिणी काली मातृसद्भावसंज्ञामवाप्नोति। प्रमातृणां स्वतन्त्रस्वप्रकाशपरसंविदेकरूपतापादनं मातुरेव हि सद्भावः। तदेवं द्वादशधा तिष्ठन्ती परा संविदेव भगवती क्रमनये परं तत्त्वम्।

शिवशक्त्योरद्वैतं भोगस्य मोक्षोपायत्वञ्च स्वीकुर्वत् कुलदर्शनमनुत्तरं परतत्त्वं प्रतिष्ठापयति।

यत्रोदितमिदं चित्रं विश्वं यत्रास्तमेति च।
तत्कुलं विद्धि सर्वज्ञं शिवशक्तिविवर्जितम् ॥

एतदेवानुत्तरं प्रत्यभिज्ञानदर्शनेऽपि षट्त्रिंशत्तत्त्वोत्तीर्णत्वेन कैश्चिद्विवेचितः नियतिरागरहितानि षट्त्रिंशत्तत्त्वान्यत्रापि स्वीक्रियन्ते। देवनागरीलिप्यक्षराणां दार्शनिकतत्त्वस्फारप्रदर्शनमत्र विशिष्टम्। तच्चाकरग्रन्थेभ्योऽनुसन्धेयमिति प्रत्यभिज्ञादर्शनाभिमतं परतत्त्वस्वरूपमभिधास्यामः।

त्रिकषडर्धसारस्पन्दप्रत्यभिज्ञांप्रमुखाभिर्भिन्नाभिरभिख्याभिरभिधीयमानं शिवाद्वय-प्रतिपादकं माहेश्वरदर्शनं साम्प्रतं काश्मीरशैवदर्शनमिति नाम्ना साधारणैर्जनैः साधारण्येन परिचीयते। शैवदर्शनमिदं विश्वोत्तीर्णस्य विश्ववपुषः परमशिवस्याभास-रूपाणि षट्त्रिंशत्तत्त्वानि प्रथयतितमाम्। महाद्वैतवादिनः शैवाः स्वात्मसात्कृताशेष-षट्त्रिंशत्तत्त्वकलापस्य परमशिवस्य व्यापकत्वाभिप्रायेण सप्तत्रिंशत्त्वमविकल्पात्मकत्वं च भाव्यं विश्वोत्तरणेत्यविकल्पात्मकस्य मनसो वाचां च पारे वर्तमानस्य विश्वोत्तीर्णस्याष्टात्रिंशत्त्वमप्युद्धोषयन्ति। एतदेव कुलदर्शनस्यानुत्तरं तत्त्वम्। यदुक्तं **श्रीतन्त्रवटधानिकायाम्–**

षट्त्रिंशत्तत्त्वपर्यायस्तदभिन्नः परः शिवः।
उपदेश्यतया सोऽपि स्यादवच्छेदभागतः।
अष्टात्रिंशं परं धाम यत्रेदं विश्वकं स्फुरेत् ॥

प्रत्यभिज्ञाप्रक्रियायां तु शिवादिधरणीप्रान्तानां षट्त्रिंशत्तत्वानामेव विशिष्य विवेचनम् । शैवशासननये प्रकाशविमर्शात्मनः परमशिवस्य सर्वज्ञत्वं सर्वकर्तृत्वं चाम्नातम् । ज्ञानक्रिययोरभेदाभ्युपगमात् प्रकाशविमर्शयोर्भेदो वस्तुतस्त्वौपाचारिक एव । विमर्शो हि चित्, चैतन्यम्, स्वरसोदिता परा वाक्, स्वातन्त्र्यम्, परमात्मनो मुख्यमैश्वर्यम्, कर्तृत्वं, स्फुरत्ता, सारः, हृदयं, स्पन्द इत्यादिभिः शब्दैरागमेषूद्घोष्यते।[30] अनवच्छिन्नपरप्रकाशः परमेशः स्वस्वातन्त्र्यवशात् शिवादितत्त्वात्मना प्रविभज्यते, तदात्मना स्फुरति प्रकाशते वा । सृष्टिक्रमावभासे हि क्रमेण चिदानन्देच्छाज्ञान-क्रियाशक्तीनां प्राधान्यम् । उपपन्ना ह्येतासां शक्तीनां मनोविज्ञानदिशा क्रमप्रथा । उपनिषदोऽप्यमुमेव क्रममवगमयन्ति । शिवादिसद्विद्यान्ततत्त्वोन्मीलने परमशिव-स्यापरिच्छिन्नं शुद्धस्वातन्त्र्यमेव तत्तद्वैचित्र्येण चकास्ति । परमशिवस्य चिच्छक्ति-प्राधान्ये विश्वप्रतिष्ठाभूमिर्विश्वकैविग्रहो निखिलविश्वक्रोडीकारेण द्योतमानः शुद्धाहमामर्शरूपः प्रकाशैकघनः शिवः । शिवतत्त्वमिदं सर्वप्रमातृणामन्तःस्फुरत्पूर्णा-हन्ताचमत्कारमयं परत्वेन विश्वोत्तीर्णमपि विश्वावभासनदृशा विश्ववपुरवियुक्त ज्ञानक्रियारूपं क्रियाद्वारेण सकलतत्त्वराशिगतसृष्टिस्थितिसंहारशतप्रतिबिम्बसहिष्णुः महाप्रकाशवपुरिति वर्ण्यते । यदुक्तं **शिवदृष्टौ**–

आत्मैव सर्वभावेषु स्फुरन्निर्वृत्तचिद्वपुः ।
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः ॥ (1.2)

यथा च **श्रीविज्ञानेन्दुकौमुद्याम्**–

सर्वव्यापकताभूमिर्ज्ञत्वकर्तृत्वसम्मता ।
निजाभासचमत्कारमयी शिवदशा स्मृता ॥

शिवैकरूपं विश्वं न ततोऽतिरिच्यमानमिति शिवतत्त्वं सर्वतत्त्वानां साम्यावस्था । तथा हि **शिवदृष्टौ**–

एवं सर्वपदार्थानां समैव शिवता स्मृता ।
परापरादिभेदोऽत्र श्रद्दधानैरूदाहृतः ॥ (1.48)

प्रक्रियाभेदेन काली-भैरव-परमशिवादिसंज्ञितमेकमेवानुत्तरं षट्त्रिंशत्तत्त्वग्रामेष्वा-त्मानमाभासयति, अवभासितांश्च पदार्थान् स्वात्माभेदेन परामृशतीति बहुधा प्रपञ्चितं पश्चादपि प्रपञ्चयिष्यते ।

वस्तु-प्रमेय-सामान्य-पदार्थपर्यायं किमिदं तत्त्वं नाम? तस्य भावस्तत्त्वमिति व्युत्पत्त्या भेदेन स्थितानां बहूनां वर्गाणां बहुष्वङ्गेषु सामान्येन स्थितं 'यद्रूपं बहुधातुगामि' तत् सामान्यस्पन्दरूपत्वेन निखिल-व्यक्तिरूपाभासान्तरयोगेन तनन-सहिष्णुत्वादविभक्तं वर्गीकरणं तत्त्वम् । यथा गिरि-वृक्ष-पुर-प्रभृतीनां समानधर्मिणां भिन्नानां पृथिवीरूपत्वम् । स्वकार्ये धर्मसमुदाये स्वसदृग्गुणे सामान्यतस्तननाद् व्याप्तृभावतस्तत्त्वशब्दस्यात्मार्थलाभः । यथाहुः **श्रीमदभिनवगुप्तपादाः**–

स्वस्मिन्कार्येऽथ धर्मौघे यद्वापि स्वसदृग्गुणे ।
आस्ते सामान्यकल्पेन तननाद् व्याप्तृभावतः ॥ (तन्त्रालोके 6.4-5)

त्रिकदर्शने प्रातिभज्ञानोपस्कृतो युक्त्याऽप्यवधारितोऽबाधितश्च तत्त्वग्रामः प्रत्यक्षानुमानयोः परिच्छिन्नत्वाच्छैवागमानेव परमं प्रमाणयति । जडचेतनलक्षणस्य तमःप्रकाशवद्विरुद्धस्वभावस्य 'इदमिति' 'अहमिति' परिचायितस्य विषयविषयि-विभागविपन्नस्य संसारस्य परमशिवाभासरूपत्वं स्वीकुर्वतस्तत्त्वसन्दोहस्य द्विविधस्तावदध्वाः । एको मायामेयताऽभावात् शुद्ध इति । अपरश्च मितत्वादशुद्ध इति रहस्यविद्भिर्ज्ञायते । तत्र तावदसिताध्वा मनाग् दिग्भेदेन शास्त्रान्तरसाधारणः। शुद्ध एवाध्वा त्रिकदर्शनस्य तदितरदर्शनवैलक्षण्यं व्यवस्थापयति । शिवो हि परिस्फुरत्स्वातन्त्र्यशक्तिमहिम्ना शुद्धाशुद्धभेदेन चकास्ति । तस्यैव चाणव-कार्म-मायीय-मलरहितस्य सतः स्वेच्छामहिम्ना प्रथमोऽवभासः शुद्धाध्वा । शिवेच्छैव स्वातन्त्र्य-शक्त्या जगदुल्लिलासयिषया यत्[31] पञ्चधा प्रविभज्यते तच्छुद्धाध्वपञ्च-कम् । यदाहुः–

तदेवं पञ्चकमिदं शुद्धोऽध्वा परिभाष्यते । (तन्त्रालोके 6.55)

अत्र च तत्त्वपञ्चके क्रमशः शाम्भव-शक्तिज-मन्त्र-महेश-मन्त्रनायक-मन्त्राख्यः शुद्धचैतन्यात्मा प्रमातृवर्गः । यथाहुः–

शाम्भवाः शक्तिजा मन्त्रमहेशा मन्त्रनायकाः ।
मन्त्रा इति विशुद्धाः स्युरमी पञ्चगणाः क्रमात् ॥ (तन्त्रालोके)

शिवावस्थायां शाम्भवप्रमातुः शुद्ध एवाहमामर्शः ।

शैवदार्शनिकैः शिवशक्त्योर्नित्याव्यभिचरद्रूपत्वमाम्नायते । शक्त्या विरहितः शिवः शव एवेति तेषां राद्धान्तः । वह्निदाहिकयोरिवानयोर्नित्यं तादात्म्यम् । यथाहुः–

शक्तिश्च शक्तिमद्रूपाद् व्यतिरेकं न वाञ्छति ।
तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव ॥
(अभिनवगुप्तस्य बोधपञ्चदशिकायाम्–3)

अमुमेवार्थं श्लोकयामासुर्भगवत्पादश्रीशङ्कराचार्याः–

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम् ।
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ॥
(आनन्दलहर्य्याम्–1)

शिवशक्त्योस्तादात्म्यान्न तत्र धर्माधर्मिभावो गुणिगणभावोऽशांशिभावो विशेषण-विशेष्यभावो वा शङ्कनीयः । शिवो यदाऽऽनन्दचमत्कारोद्रेकेण स्वस्वातन्त्र्यमाहात्म्याद् बहिरुल्लिसिषया-विश्वमेषितुं ज्ञातुं कर्तुं चोन्मुखो भवति तदा शक्तिस्वभावोऽ-भिधीयते । शिवस्यैव विश्ववैचित्र्यावभासनोन्मुखस्य किञ्चिदुच्छूनतावस्थायां शक्ति-तत्त्वव्यपदेशः ।[32] शक्तिजगणस्यानन्दशक्तिप्रमुखाया शक्तितत्त्वावस्थायाम् 'अह-मस्मी'-त्यामर्शः । शक्तिरेव विमर्शः, कर्तृत्वं, स्वातन्त्र्यं, स्वभावः स्पन्दश्च शिवस्य ।

इच्छाशक्तिप्राधान्येऽनन्योन्मुखस्वात्मप्रकाशताविश्रान्तिरूपाया अहन्तालक्षणायाः ज्ञानशक्तेरुद्रेके शिवस्यैव सदाशिवतत्त्वव्यपदेशः–

किन्त्वान्तरदशोद्रेकात्सादाख्यं तत्त्वमादितः। (भास्कर्य्याम् 2 पृ. 217)

मन्त्रमहेशरूपशुद्धचैतन्यवर्गस्य विश्वमुन्मीलितमात्राचित्रकल्पतयैव भाति न पुनर्व्यक्ताकारतया। अस्य च अहमित्यधिकरणे इदन्तोल्लासरूपः 'अहमिदम्' इत्यामर्शः। यथाह **श्रीभास्करः–**

"भावानान्तु स्तोकमिदन्तास्पर्शरूपितयाऽहंतया ग्रहणम्, यत्सर्वमिदं तदहमेव न त्विदमाख्यं किमपि वस्तु भवति, एकस्य चिन्मात्रस्यैव सत्त्वात्।" (भास्कर्य्यां भागे 2 पृ. 226) आरोहक्रमेण (संहारक्रमेण) विश्वस्यास्फुटत्वापादनादहन्तारूपतोद्रेचनाच्च 'अन्तर्निमेषः' सदाशिव इत्यपि व्यपदिश्यते। 'यतः प्रभृति सदिति प्रख्येति' वचनात् सदाशिवतत्त्वादेव सदिति प्रसिद्धिः। यथाह भास्करकण्ठः–'अतः पूर्वं हि शक्त्यादौ असदित्यनेन प्रतियोगिना परिमितीकृता सत्तापि न युक्तेति भावः।' (तत्रैव पृ. 218)

चिदानन्दप्रभृतिषु पञ्चशक्तिषु ज्ञानस्य स्फुटत्वे (अत्र वेद्यजातस्य स्फुटावभासनाज्ज्ञानशक्त्युद्रेक इति राजानक **आनन्दः स्वविवरणे**) इदन्तालक्षणायाः क्रियाशक्तेश्चोद्रेके ईश्वरतत्त्वम्। सदाशिवतत्त्वेऽन्तःकरणैकवेद्यस्य विश्वस्येश्वरतत्त्वे व्यक्ताकारतयाऽनुसन्धानम्। इदन्ताया अहन्तापेक्षया किञ्चिदुद्रिक्तत्वाद् 'इदमहम्' इति मन्त्रेश्वरवर्गस्यामर्शः।[33] यथाहुः–"इदमहमिति तु इदमित्यंशे स्फुटीभूतेऽधिकरणे यदाहमंशविमर्शं निषिञ्चति तदेवेश्वरता। इदन्तारूपस्य विश्वस्य स्फुटत्वापदनाद् 'बहिरुन्मेषः' एवेश्वरः। विश्वस्य हि स्फुटत्वबाह्यत्वमुन्मेषणम्।" (**भास्कर्यां पृ. 221**)

अहन्तेदन्तयोरैक्यप्रतिपत्तिः सद्विद्या। प्रमातरि अहमिति, प्रमेये चेदमिति धीर्वैयधिकरण्यमुच्यते, तयोः पुनः सामरस्यम्, 'अहमिदं धियोः' सामानाधिकरण्यमेव, सद्विद्यात्वम्। यथाहुः–'सामानाधिकरण्यञ्च सद्विद्याऽहमिदंधियोः।" तथा ह्यत्र 'अहमिदम्' इति समधृततुलापुटन्यायेन विमर्शः। सद्विद्या नाम सती शुद्धा विद्या। शुद्धिः पुनरस्या बहिष्ठत्वेनावभासमानस्येदन्तास्पर्शरुषितस्य वेद्यवर्गस्य 'अहमिति' परामर्शोपपादनम्। यथाहुः–"शुद्धबहिष्कृतार्थानां स्वाहन्तायां निमज्जनम्।" परमार्थतश्चिदेकरूपा अपि भावा अचिदात्मना, प्रमेयत्वेन इदन्तया वा स्फुरन्तीति तेषां यथावस्त्ववभावसनमेव शुद्धिरुत्कृष्टत्वमविपरीतता वा।

"अन्ये पुनः शुद्धिमित्थमस्या मन्यन्ते यत् सदाशिवादिष्वहमिदमिति सामरस्यशालिनी संविदस्ति। तत्र सामानाधिकरण्यादैकरस्ययोगेऽपि मायीयस्येदन्तांशोल्लासस्यावर्जनीयत्वात् सदाशिवादीनां च मायावार्तानभिज्ञत्वात् सोऽयमिदन्तांशो मायीयतादोषव्युदासादहम्भागवदनया प्रतीयमानत्वेनावस्थाप्यते। तत्प्रतीतिव्यतिरेके तु तत्समानाधिकरण्यमेव भज्येत।" अहमंशस्याच्छादकत्वावभासनं मायीयदोषनिरासपूर्वमिदन्तावभासनं वा शुद्धविद्येत्याचार्याः। अत्र च क्रियाशक्तेः प्राधान्यम्।

मन्त्रवर्गश्चात्र प्रमाता । तत्र सदाशिवतत्त्वे सदाशिवोऽधिष्ठाता, ईश्वरतत्त्वे ईश्वरः, विद्यातत्त्वे च सदाशिवेश्वरौ । अधिष्ठातृदेवतानां तत्त्वान्तरत्वं नाशङ्कनीयम् । यथा पृथिवी तत्त्वमिति स्वीकारेऽपि नृपं न कोऽपि शास्त्रकारस्तत्त्वान्तरत्वेन मनुते तथैव सदाशिवादीनामधिष्ठातृदेवानामपि तत्त्वान्तरत्वं कथङ्कारं स्यात्?

तत्त्वपञ्चकमिदं परमशिवस्यैव चिदादिशक्तिव्यापारोल्लासादवस्थाभेदरूपम् । शिवस्वातन्त्र्यमेव स्वात्मनि स्वरूपभेदं तावद् दर्शयति । तत्त्वपञ्चके चास्मिन् देशकालरहितत्वात् तत्कृतः क्रमोऽपि नास्ति । चित्रशक्तिशतखचिते शिवे शक्तिव्यापृतिभेदादुपदेशार्थं भिन्नतत्त्वप्रकाशः शैवशासननये कल्प्यते वस्तुतस्त्वभेद एव । **यथोक्तमध्वसिद्धौ–**

चित्रशक्तिसहस्राढ्यं शिवतत्त्वं समातिगम् ।
विभक्तं पञ्चधा चैकं शक्त्युल्लासविभेदतः ॥


भास्करकण्ठेन भास्करीटीकायां शुद्धाध्वनः पञ्चतत्त्वानां संग्रहेण निरूपणं कृतं तदप्यत्रोल्लेखमर्हति बुभुत्सूनां सौकर्याय स्फुटतरप्रतिपत्तये च ।

नित्याव्यभिचरद्रूपयोः प्रकाशशुद्धाहंविमर्शयोः शिवशक्तितत्त्वव्यवहारः, वेद्यत्वाभावात् प्रमातृत्वमप्यत्र शिवस्यैव भावानाञ्चाहन्तयैव ग्रहणम् । अपरिमिताहन्तेदन्तविषये सदाशिवतत्त्वव्यवहारः । अत्र तु वेद्यतोद्भवेन मन्त्रमहेश्वररूपश्चेतनवर्गः प्रमाता, भावानान्तु स्तोकमिदन्तास्पर्शरूषितया ग्रहणम् यत्सर्वमिदं तदहमेव न त्विदमाख्यं किमपि वस्तु भवति एकस्य चिन्मात्रस्यैव सत्त्वादिति । तयोरेवाहन्तेदन्तयोः समत्वे ईश्वरतत्त्वव्यवहारः । अत्र मन्त्रेश्वरः प्रमाता । भावानान्तु समधृततुलान्यायेनेदन्ताऽहन्ताभ्यां ग्रहणम् । चिच्चेत्यभागयोः इदमिति विषये तु शुद्धविद्यातत्त्वव्यवहारः, भावानान्तु स्तोकमहन्तास्पृष्टया इदन्तया ग्रहणम् । परन्तु शुद्धाहंस्फूर्तिरस्फुटा वर्तते एव । अन्यथा मायातत्त्वापातात् । तत्र हि प्रलयाकलाख्यः शून्यरूपः प्रमाता । न चात्राहन्तेदन्तयोः परस्परं प्रति स्फुटं प्रतियोगित्वं शङ्क्यं येन विकल्परूपतापातः स्यादपि तूभयमप्यत्र पर्यायेणापरिमितमेव । मायापदे तु तयोः परस्परं प्रतिस्फुटं प्रतियोगित्वमेव । यस्तु परशिवः सर्वत्र सर्वमय एवेति न तस्येह प्रस्तावः । (**भास्करीभागे २ पृ. 227**)

अपरस्तावच्छुद्धेतरोऽध्वा श्रीमताऽघोरेशेनाऽवभास्यते । तथा हि तत्रैव–

ईश्वरेच्छावशक्षुब्धभोगलोलिकचिद्गणान् ।
संविभक्तुमघोरेशः सृजतीह सितेतरम् ॥[34]

एतस्मिन् सितेतराध्वनि वेदान्तिनां माया, सांख्यानां पञ्चविंशतितत्त्वानि शैवदर्शनाभिमताः पञ्चशक्तयश्च संगृह्यन्ते । माया-विद्या-कला-राग-नियतिरूपं परमेश्वरशक्तिपञ्चकं, पुरुषः, प्रकृतिः, महदहङ्कारमनोरूपं त्रिविधमन्तःकरणं, बुद्धिकर्मेन्द्रियाणि दश, स्थूलसूक्ष्मत्वभेदतश्च दशधा कार्यवर्गः (तन्मात्रपञ्चकं भूतपञ्चकं च) इत्येवमशुद्धाध्वन्येकत्रिंशत्तत्त्वानि । इत्थमस्त्ययं तत्त्वप्रकाशः–



इदन्तापादकस्याशुद्धाध्वनः एकत्रिंशत्तत्वेषु पञ्चविंशतितत्त्वानि प्रायशः सांख्यदर्शनसाधारणानि । मायासहितं कञ्चुकषट्कं त्रिकदर्शनवैशिष्ट्यं प्रकटयति । तदेव निरूप्यते । तत्र प्रथमं तत्त्वं मायाख्यम् । सा हि परमशिवस्यैव दुर्घटसम्पादिका स्वातन्त्र्यशक्तिर्या ह्याणवादिमलत्रयेण शिवमावृणोति[35], मोहिनीयं[36] विकल्पशिल्पान्येकरसे स्वभावे उद्भावयति ।[37] निजांशजातेषु जीवेषु भेदबुद्धिं जनयति[38], भेदप्रथाया मूलभूता सैवानन्तभाविविभासगर्भीकरणात् परा निशेत्यभिधीयते[39], भेदात्मकजडकार्यनिष्पादकत्वाज्जडा, विश्वमूलत्वाद् व्यापिनी सूक्ष्मा शिवशक्त्यविनाभावित्वाच्च नित्या मूलकारणञ्च व्यपदिश्यते ।[40] शिवस्याविनाभावित्वात्तत्त्वा-

तन्त्र्योत्कर्षकाष्ठारूपत्वाच्च मायेयं न हि वेदान्तिनां सदसद्विलक्षणा मिथ्याप्रत्ययरूपा मायेव ब्रह्मणः पारतन्त्र्यमभिव्यनक्ति । स्वात्मप्रच्छादनक्रीडापण्डितस्य शिवस्य स्वातन्त्र्यविजृम्भिता माया ।

मायापरिग्रहवशादेव बोधो मलिनतामाप्नोति । स्वतन्त्रोऽपि पतिः काल-कला-नियति-राग-विद्या-रूपैः पञ्चभिः पाशैर्बद्धः[41] कञ्चुकैर्वाऽवेष्टितः पशुर्भवति । तदुक्तम्—

मायापरिग्रहवशाद् बोधो मलिनः पुमान् पशुर्भवति ।
काल-कला-नियतिवशाद्रागाविद्यावशेन सम्बद्धः ॥[42]

(परमार्थसारे श्लो. 16)

एतेषु पञ्चसु कर्तृत्वसंकोचरूपायाः कलाया ज्ञातृत्वसंकोचरूपायाश्च विद्यायाः प्रथमं कलनमावश्यकं तयोः संकोचदिवान्येषां काल-राग-नियतीनां प्रवृत्तिरात्मपदं लभते । कला सम्पूर्णकर्तृत्वं, विद्या सर्वज्ञत्वं, रागः पूर्णत्वं, कालो नित्यत्वं, नियतिः स्वातन्त्र्यं व्यापकत्वञ्च परिच्छिनन्ति । तत एव—"कलाविद्याकालरागनियतिभिरोतप्रोतो मायया-पहृतैश्वर्यसर्वस्वः सन् पुनरपि प्रतिवितीर्णतत्सर्वस्वराशिमध्यगतभागमात्र एवम्भूतोऽयं मितः प्रमाता भाति, इदानीमिदं किञ्चिज्जानानः, इदं कुर्वाणः, अत्र रक्तः, अयमेव च यः सोऽहम् ।"[43]

—ईश्वरप्रत्यभिज्ञाविमर्शिन्याम् भास्कर्य्याम् (2 पृ. 238)। **महार्थमञ्जरीटीकायां** (पृ. 49) पञ्चकञ्चुकानां स्वरूपं संक्षेपेण प्रकटितम् । तथा हि—"कला[44] तस्य किञ्चित्कर्तृत्वहेतुः, विद्या[45] किञ्चिज्ज्ञातृत्वकारणं, रागो विषयेष्वभिष्वङ्गः[46], कालो भावाभावानां भासनाभासनक्रमः, नियतिः[47] ममेदं न ममेदमित्यादिनियमनहेतुः । एतत्पञ्चकञ्चागमेषु स्वरूपावरकत्वात् कञ्चुकमित्युच्यते । तदेव च शक्तिपञ्चकमपि व्यपदिश्यते । इत्थं वाङ्मयोल्लेखपुरस्सरं निरूपिता प्रमाणमीमांसा तत्त्वमीमांसा च ।

---

1. प्रवर्ततां प्रकृतिहिताय पार्थिवः
   सरस्वती श्रुतिमहती महीयताम् ।
   ममापि च क्षपयतु नीललोहितः
   पुनर्भवं परिगतशक्तिरात्मभूः ॥ —अभिज्ञानशाकुन्तले 7.35
2. सम्पूर्णश्लोक एवमुद्धृतो विद्यते तन्त्रालोकविवेके (2.38)—
   स्वं कर्तव्यं किमपि कलयंल्लोक एष प्रयत्नात्
   नो पारर्थ्यं प्रति घटयते काञ्चन स्वात्मनिवृत्तिम् ।
   यस्तु ध्वस्ताखिलभवमलः भैरवी भावपूर्णः
   कृत्यं तस्य स्फुटमिदमियल्लोककर्तव्यमात्रम् ॥
   अयमेवाभिप्राय आचार्याभिनवगुप्तपादैरन्यैः शब्दैरभिव्यक्तीकृतः—
   समस्तयन्त्रणातन्त्रत्रोटनाटङ्कधर्मिणः ।
   नानुग्रहात्परं किञ्चिच्छेषवृत्तौ प्रयोजनम् ॥

   —तन्त्रालोके 2.38

जीवन्मुक्तयोगिभिर्मन्त्र-ध्यान-पूजा-स्थानकल्पनादिकृत्यानि न कर्तव्यानि, तस्य एकमेव प्रयोजनं वर्तते-लोकानुग्रहः'; इत्यपि तत्रैव (2.37) स्पष्टम् ।

3. 'ज्ञातुमिच्छा जिज्ञासा । अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म, फलविषयत्वादिच्छायाः । ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म' । ब्रह्मसूत्रशाङ्करभाष्यम् 1.1,

4. ऋषीणामपि यज्ज्ञानं तदप्यागमहेतुकम् ॥ वाक्यपदीयम् 1.

5. (क) विमर्शरूपिणी शक्तिरस्य विश्वगुरोः सदा ।
परिस्फुरति सैकाऽपि नानाभावार्थरूपिणी ॥

(ख) गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः ।
प्रश्नोत्तरपदैर्वाक्यैः तन्त्रं समवतारयत् ॥

(ग) प्रकाशात्मकः परशिवोऽहमेव विश्वानुग्रहपरः परापश्यन्ती-मध्यमा-वैखरीक्रमेण व्यापृत्य विमर्शांशेन प्रकटीभूत्वा प्रकाशांशेन प्रतिवचनदाताऽपि सन् तन्त्रं समवतारयामि ।

6. (क) किरणागममतेनाष्टादशरौद्रागमाः (1) विजय–(2) परमेश्वर–(3) निश्वास–(4) प्रोद्गीत– (5) मुखबिम्ब–(6) सिद्धमत–(7) सन्तान–(8) नारसिंह–(9) चन्द्रहास–(10) भद्र–(11) स्वायंभुव–(12) विरज–(13) कांख्य–(14) माकुट–(15) किरण–(16) ललित–(17) आग्नेय–(18)? इत्यादयः

(ख) ब्रह्मयामलमतानुसारमष्टादशरौद्रागमाः (1) विरज–(2) निश्वास–(3) स्वायंभुव–(4) वाथुल–(5) वीरभद्र–(6) रौरव– (7) मुकुट–(8) वीरेश–(9) चन्द्रज्ञान–(10) प्रोद्गीत–(11) ललित–(12) सिद्धसन्तान–(13) सर्वोद्गीत–(14) किरण–(15) पारमेश्वरादयः

(ग) नयपालदेशे प्राप्ताया अष्टमशताब्दस्य निश्वासतन्त्रसंहितायाः मतेनाष्टादशागमाः सन्ति–(1) विजय–(2) निःश्वास–(3) स्वायंभुव–(4) वाथुल–(5) वीरभद्र–(6) रौरव–(7) माकुट–(8) विरज–(9) चन्द्रहास–(10) ज्ञान–(11) मुखबिम्ब–(12) प्रोद्गीत–(13) ललित–(14) सिद्ध–(15) सन्तान–(16) सर्वोद्गीत–(17) किरण–(18) पारमेश्वराः ।

(घ) तन्त्रालोककृता जयरथेन (1,18) श्रीकण्ठीतो गृहीतोद्धरणेनैते रौद्रागमाः प्रमाणीकृताः–

विजयं चैव निःश्वासं मद्गीतं पारमेश्वरम् ।
मुखबिम्बं च सिद्धं च सन्तानं नारसिंहकम् ॥
चन्द्रांशुं वीरभद्रं च आग्नेयं च स्वयंभुव ।
विसरं रौरवाः पञ्च विमलं किरणं तथा ॥
ललितं सौरभेयं च तन्त्राण्याहुर्महेश्वरि! ।

शिवागमानां रौद्रागमाणाञ्चोत्पत्तिः भगवच्छङ्करस्य ईशतत्पुरुष-सद्योजात-वामदेव-अघोराख्यपञ्चवक्त्रेभ्यः स्वीक्रियते, इत्यपि जयरथेन (1.18,) प्रतिपादितम् ।

7. (क) किरणागमानुसारं दश शिवागमाः–(1) कामिक–(2) योगज (3) चिन्त्य–(4) कारण–(5) अजित–(6) सुदीप्त–(7) सूक्ष्म–(8) सहस्र–(9) सुप्रभेद–(10) अंशुमन्तः

(ख) मृगेन्द्रतन्त्रेणापि (पृष्ठः 2) एतान्येव दश शिवतन्त्राणि सन्ति । यथा निगदितम्–

कामिकं योगजं वाथ तथा चिन्त्यश्च कारणम् ।
अजितं दीप्तसूक्ष्मौ च सहस्रश्च तथांशुमान् ॥
सुप्रभेदस्तथा ह्येते शैवाः संप्रकीर्तिताः ।

(ग) तन्त्रालोकविवेके (1,139) जयरथः श्रीकण्ठीमतेन येषां दश शैवागमानामुल्लेखं चकार तेषु मौकुटं गृहीतं वर्तते । परन्तु सुप्रभेदो न गृहीत इत्यवधेयम् ।

8. (क) राजानकजयरथो विवेके श्रीकण्ठीसंहितानुसारं, लक्ष्मीधरो वामकेश्वरतन्त्रानुसारं, भास्कररायः सेतुबन्धे, सौन्दर्यलहरीटीकाकृल्लक्ष्मीधरः 'चतुष्षष्ट्या तन्त्रैः सकल-

मतिसन्धाय भुवनं' इत्यस्य व्याख्यायाम्, सर्वानन्दस्तोऽलोत्तरतन्त्राधारेण सर्वोल्लास-तन्त्रे, महासिद्धिसारतन्त्रे रथक्रान्ता-विष्णुक्रान्ता-अश्वक्रान्तादिविभागे (जगतस्त्रिविधे विभागे) च प्रत्येकं चतुःषष्टितन्त्राणां विभिन्नाः सूचीः प्रतिपादयामासुः। अस्मिन् विषये द्रष्टव्यं गोपीनाथकविराजकृतं तान्त्रिकसाहित्यम् (पृ. 19-23)।
जयरथस्य तन्त्रालोकविवेके (प्रथमाह्निके) श्रीकण्ठीसंहितोद्धरणेन प्रदत्ता भैरव-तन्त्रस्य अष्ट अष्टकाणां सूची निम्नलिखिता विद्यते। अस्या यामलाष्टके एकतन्त्र-स्य नामोल्लेखो नोपलभ्यते। लुप्तागमसंग्रहे (भागः 2, पृ. 94-111) ब्रज-वल्लभद्विवेदी उड्डीश-कुक्कुटाख्य-कुब्जिका-रुरुभैरव-नामतन्त्राण्यपि अस्यां सूच्यां स्वीकरोति। परञ्चास्यां सूच्यां भैरवतन्त्रं न गृहीतम्। अस्मिन् विषये ते किमपि प्रमाणं नैव निदर्शयन्ति।

(1) भैरवाष्टकम् (स्वच्छन्दाष्टकम्)–(1) स्वच्छन्द–(2) भैरव–(3) चण्ड–(4) क्रोध–(5) उन्मत्तभैरव–(6) असिताङ्ग–(7) महोच्छुष्म–(8) कपालीशाः (एते स्वच्छन्दरूपास्तु बहुरूपेण भाषिताः)

(2) यामलाष्टकम्–(1) ब्रह्मयामल–(2) विष्णुयामल–(3) स्वच्छन्द–(4) रूरू–(5) ....?–(6) आथर्वण–(7) रुद्र–(8) वेतालाः

(3) मताष्टकम् (चण्डाष्टकम्)–(1) रक्त–(2) लम्पट–(3) मत–(4) लक्ष्मी–(5) चालिका–(पञ्चालिका-)–(6) पिङ्गला–(7) उत्फुल्लक–(8) विश्वाद्याः (चण्डभेदाः स्मृता ह्येते......)

(4) मङ्गलाष्टकम्–(1) पिचुभैरवी–(2) तन्त्रभैरवी–(3) ततभैरवी–(4) ब्राह्मीकला–(5) विजया–(6) चन्द्रा–(7) मङ्गला–(8) सर्वमङ्गलाः (एष मङ्गलभेदोऽयं क्रोधेशेन तु भाषितः) ·

(5) चक्राष्टकम्–(1) मन्त्रचक्र–(2) वर्ण–(3) शक्ति–(4) कला–(5) बिन्दु–(6) नाद–(7) गुह्य–(8) खचक्राणि (एष वै चक्रभेदोऽयमसिताङ्गेन भाषितः)

(6) बहुरूपाष्टकम्–(1) अन्धक–(2) रूरुभेद–(3) अज–(4) मूल–(5) वर्णमण्ठ–(6) विडङ्ग–(7) ज्वलिन्–(8) मातृरोदनानि (कीर्तिता परमेशेन रूरुणा परमेश्वरि)।

(7) वागीशाष्टकम्–(1) भैरवी–(2) चित्रिका–(3) हंसाख्या–(4) कदम्बिका–(5) हृल्लेखा–(6) चन्द्रलेखा–(7) विद्युल्लेखा–(8) विद्युमन्तः (एते वागीशभेदास्तु कपालीशेन भाषिता)।

(8) शिखाष्टकम्–(1) भैरवीशिखा–(2) वीणा–(3) वीणामणि–(4) सम्मोह–(5) डामर–(6) अथर्वक–(7) कवन्ध–(8) शिरश्छेदाः (एते देवि शिखाभेदा उन्मत्तेन च भाषिताः)

श्रीकण्ठीसंहितायामष्टेष्वष्टकेषु विभक्ता एते चतुःषष्टीग्रन्था सदाशिवचक्रेति नाम्ना स्मृताः सन्ति। अस्मिन् ग्रन्थे तस्य भेदोपभेदा निर्दिष्टा आसन्, यथा गारूडस्याष्टविंशतिः, दक्षिणमार्गस्य चतुर्विंशतिः, पश्चिमे प्रचलितस्य भूततन्त्रस्या-निर्दिष्टा भेदाः। एवमेवासंख्यतन्त्रग्रन्था आसन्, येषु कुलशास्त्रं प्रधानतया स्वी-क्रियते। तथा च तत्रायमपि निर्देशः प्राप्यते, यत् यदा त्रिकशास्त्रस्य सम्प्रदाय-परम्परा मध्ये विच्छिन्ना जाता, तदा तस्या उद्धारः संहिताकारगुरुणाऽभवत्।

9. तन्त्रालोकस्य 13.301 कारिकाया विवेकेऽस्य पद्यस्य पाठान्तरं प्राप्यते। तच्चेदम्–

वेदाच्चैवं ततो वामं ततो दक्षं ततो मतम्।
ततः कुलं ततः कौलं त्रिकं सर्वोत्तमं परम्॥

'त्रिकार्थस्यैव परमोत्कृष्टत्वात्। ....उलङ्घनवशादिति सिद्धान्तानन्तरं दक्षे, ततः कुले, ततः षडर्धे चेति। झटित्यक्रममेवेति त्रिकार्थ एवेति'–तत्रैव जयरथः।

10. क्रमनयसोदरतामस्य दर्शनस्यावेदयति–ततश्च प्रागियं शुद्धा.....। –तन्त्रालोके 4.148.

11. (अ) 'कुलादौ' अद्वयदर्शने पुनरसौ लिङ्गपूजा निषिद्धा, यतो देह एव सर्वाध्वामयः–इति तत्रैवतत्साक्षात्कारः सुलभः–इति किमनुपपत्तिना बाह्येन लिङ्गादिना फलम् ।....इह पुनः परमाद्वयरूपे त्रिकदर्शने तद्विधिना तन्निषेधेन वा न किञ्चित्प्रयोजनम् ।

—तन्त्रालोके 3,286.

(आ) 'कौले' कुलदर्शने पुनरस्य जटाभस्मादेः 'त्यागो' निषेधो विहितः ।....इह पुन सर्वात्म्यात् तद्विधिप्रतिषेधौ न भवतः ।

—तन्त्रालोके 3 पृ. 2889

(इ) परतत्त्वप्रवेशे तु यमेव निकटं यदा ।
उपायं वेत्ति स ग्राह्यस्तदा त्याज्योऽथ वा क्वचित् ॥
न यन्त्रणाऽत्र कार्येति प्रोक्तं श्रीत्रिकशासने ।

—तन्त्रालोके 3.302

12. कान्तिचन्द्रपाण्डेयाः, अभिनवगुप्तः एन हिस्टोरिकल एण्ड फिलासफिकल स्टडी, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, 1963 पृ. 295 ।

13. विस्तरार्थं प्रमाणार्थञ्च द्रष्टव्यं तत्रैव पृ. 295-96, 597-605 ।

14. द्रष्टव्यः स्पन्दनिर्णयः पृ. 2 ।

15. उत्पलभट्टमतेन स्पन्दकारिकायाः कर्ता भट्टकल्लट एव (स्पन्दप्रदीपिकायां पृ. 53) । परञ्च क्षेमराजः (स्पन्दनिर्णये 4.2) तत्कर्तारं वसुगुप्तं स्वीकरोति, कल्लटस्तु तट्टीकाकार इति । भट्टभास्करस्य (एकादशशताब्दीकस्य) शिववार्त्तिकानुसारं कल्लटः शिवसूत्रवृत्तिः–स्पन्दसर्वस्वतत्त्वार्थचिन्तामण्यादिग्रन्थैः सह स्पन्दकारिकाया कर्ता वर्तते । स्पन्दकारिका शिवसूत्रस्य टीका त्रिकशास्त्रस्य प्रतिपादिका च विद्यते ।

16. (क) सोमानन्दः शिवदृष्टौ (7.107-110) त्रिकदर्शनस्यैतिह्यमेवं निबध्नाति–

शैवादीनि रहस्यानि पूर्वमासन् महात्मनाम् ।
ऋषीणां वक्त्रकुहरे तेष्वेवानुग्रहक्रिया ॥
कलौ प्रवृत्ते यातेषु तेषु दुर्गमगोचरे ।
कलापिग्रामप्रमुखे समुच्छिन्ने च शासने ॥
कैलासाद्रौ भ्रमन् देवो मूर्त्या श्रीकण्ठरूपया ।
अनुग्रहायावतीर्णश्चोदयामास भूतले ॥
मुनिं दुर्वाससं नाम भगवानूर्ध्वरेतसम् ।
नोच्छिद्येत यथाशास्त्रं रहस्यं कुरु तादृशम् ॥

(ख) श्रीमदभिनवगुप्तगुरुनिरूपितः सिद्धातन्त्रनिर्दिष्टाऽऽयातिक्रमभिन्नः कश्चन क्रमोऽपि वर्णितः–

तेषां क्रमेण तन्मध्ये भ्रष्टं कालान्तराद्यदा ।
तदा श्रीकण्ठनाथाज्ञावशात् सिद्धा अवातरन् ॥
त्र्यम्बकामर्दकाभिख्यश्रीनाथा अद्वये द्वये ।
द्वयाद्वये च निपुणाः क्रमेण शिवशासने ॥
आद्यस्य चान्वयो जज्ञे द्वितीयो दुहितृक्रमात् ।
स चार्धत्र्यम्बकाभिख्यः सन्तानः सुप्रतिष्ठितः ॥
अतश्चार्धचतस्रोऽत्र मठिकाः सन्ततिक्रमात् ।
शिष्यप्रशिष्यैर्विस्तीर्णाः शतशाखं व्यवस्थितैः ॥

—तन्त्रालोके 36.11-14

17. (क) प्रमातृवर्गो मानौघः प्रमाश्च बहुधा स्थिताः ।
मेयौघ इति सर्वमत्र चिन्मात्रमेव ततः ॥ —तन्त्रालोके 4.171

(ख) एवं मा मातृमानत्वमेयत्वैर्योऽवभासते ।
षड्विधः स्ववपुः शुद्धौ शुद्धिं सोऽध्वाधिगच्छति ॥ —तत्रैव 11. 82-83

(ग) पर एव हि प्रमाता स्वस्वातन्त्र्यात्, स्वं स्वरूपं गोपयित्वा संकुचितज्ञानात्मतामवभास्य ज्ञेयमपि।

—तन्त्रालोकविवेके 3. 128

(घ) प्रमातृमेयतन्मानप्रमारूपं चतुष्टयम्।
विश्वमेतदधिष्ठेयं यदा जाग्रत्तदा स्मृतम्॥

—तन्त्रालोके 10. 233

18. ईश्वरप्रत्यभिज्ञाविमर्शिन्याम् 11.4
19. तत्रैव पृ. 399
20. तत्र च चित्तत्त्वस्यैव स्वातन्त्र्यं मायाशक्तितया भिन्नं यत् संवेद्यं प्रमातुश्च अन्योऽन्यतश्च मायाशक्त्या भिन्नेन प्रमातुरन्योऽन्यतो वेद्याच्च करणवर्गेण यत् संवेद्यं स एव गोचरो विश्रान्तिपदं यस्याः तादृशी सती 'सैव' प्रत्यवमर्शस्सा परा वाग्रूपा ज्ञानमिति सङ्कल्प इति अध्यवसाय इति चोच्यते। आदि ग्रहणात् संशयः स्मृतिः इत्यादि।

—तत्रैव 1. 281-2

21. "यतः प्रमाणं नाम नवाभासरूपं प्रमातरि प्रमितिलक्षणां विश्रान्तिं विदधत् प्रमाणं भवति। प्रमाता चाविच्छिन्नाभासः सर्वाश्चं प्रमितीः स्वात्मनि अन्तर्मुखरूपे भजते। तत् तस्मिन् कथमभिनवाभासस्तत्प्रमितिश्च कुत्र विश्राम्यतु, तस्मात् देह-प्राण-पुर्यष्टकशून्यप्राय एव प्रमातरि प्रमाणमुच्यताम्।"

—तत्रैव 2. 138

22. (क) "न वस्तु याथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्। किं तर्हि वस्तुतन्त्रमेव तत्। न हि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति। तत्र पुरुषोऽन्यो वेति मिथ्याज्ञानम्। स्थाणुरेवेति तत्त्वज्ञानम्, वस्तुतन्त्रत्वात्। एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्।"

—ब्रह्मसूत्रशाङ्करभाष्ये 1.1.2.

(ख) "अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या किं तर्हि? प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुतन्त्रा।"

—तत्रैव 1.1.4.

(ग) "क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च।"

—तत्रैव 1.1.4.

23. (क) "ततश्च प्रमातैव कारणं भवति न जडः। ह्यर्थे च। यस्मात् स प्रमाता कार्यस्यान्तर्बहिराभासनद्वयनिमित्ततया स्थितस्तेन विना तदपेक्षस्याभासद्वयस्यानुपपत्तेः, तस्मादेकस्य प्रमातुरेव न तु कथञ्चित् जडस्य उदिता प्रसाधितरूपा क्रिया निर्मातृता भवतीति।"

—ईश्वरप्रत्यभिज्ञाविमर्शिन्याम् 2.162

(ख) एवमन्तर्बहिर्वृत्तिः क्रिया कालक्रमानुगा।
मातुरेव तदन्योऽन्यावियुक्ते ज्ञानकर्मणी॥

—ईश्वरप्रत्यभिज्ञायां कारिका 3.1.1

24. It is a basic aim of *Asian Philosophy* to break through the barriers which have been erected in the name of the 'critical Analytic method of the Anglo-American Tradition.

Editor's statement in Asian Philosophy Vol. 1. No. 1. Journals Oxford Ltd. 1991. p. 3.

[आंग्ल-अमेरिका-परम्परया समीक्षात्मक-विश्लेषणात्मक-पद्धतिव्यपदेशेन स्थापितानामवरोधानां निरासः **एशियन-फिलासफी** (नाम्न्याः पत्रिकायाः) मूलमुद्देश्यम्]

—संपादकस्य वक्तव्यम्

25. नित्यत्वमविसंवाद इति नो मानकारणम्। —तन्त्रालोके 35.39

26. 'आ समन्तादर्थं गमयति' इति आगमसंज्ञकं प्रमाणं सर्वस्य तावद्भवति ।
–ईश्वरप्रत्यभिज्ञाविमर्शिन्याम् 2.3.2

27. अपूर्णाख्यातिरूपाऽख्यातिरेव भ्रान्तितत्त्वम् ।
–तत्रैव 2.3.13.

28. तन्त्रालोकविमर्शे तृतीयभागे पृ. 195.
29. तत्रैव पृ. 124.
30. पराप्रवेशिकायाम् पृ. 1-2
31. (क) शिवः स्वतन्त्रदृग्रूपः पञ्चशक्तिसुनिर्भरः ।
स्वातन्त्र्याभासितभिदा पञ्चधा प्रविभज्यते ॥
–तन्त्रालोके 6.48

(ख) चिदानन्देषणाज्ञानक्रियाणां स्फुटत्वतः ।
शिवशक्तिसदेशानविद्याख्यं तत्त्वपञ्चकम् ॥
–तन्त्रालोके 6.49

32. स एव विश्वमेषितुं ज्ञातुं कर्तुं चोन्मुखो भवन् ।
शक्तिस्वभावः कथिता हृदयत्रिकोणमधुमांसलोल्लास ॥
–महार्थमञ्जर्याम् पृ. 40.

33. ईश्वरतत्त्वे स्फुटेदन्ताहन्तासामानाधिकरण्यात्मयादृग् विश्वं ग्राह्यं तथाविध एव ईश्वरभट्टारकाधिष्ठितो महेश्वरवर्गः ।
–प्रत्यभिज्ञाहृदये पृ. 4. (जयदेवसिंहसंस्करणे)

34. शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः ।
–तन्त्रालोके 6.56

35. परमं यत्स्वातन्त्र्यं दुर्घटसम्पादनं महेशस्य ।
देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत् ॥
–परमार्थसारे 15.

36. मोहयति अनेन शक्तिविशेषेण इति वा मोहो माया शक्तिः ।
–ईश्वरप्रत्यभिज्ञाविमर्शिन्याम् 1.35

37. एकरसे स्वभावे उद्भावयन्ती विकल्पशिल्पानि ।
मायेति लोकपतेः परमस्वतन्त्रस्य मोहिनीशक्तिः ।
–महार्थमञ्जरी, श्लोकः 17

38. (क) माया च नाम देवस्य शक्तिरव्यतिरेकिणी ।
भेदावभासस्वातन्त्र्यं तथा हि स तया कृतः ॥
–तन्त्रालोके 6.116

(ख) माया विभेदबुद्धिर्निजांशजातेषु जीवेषु ।
–षट्त्रिंशत्तत्त्वसन्दोहे श्लो. 5.

39. आद्यो भेदावभासो यो विभागमनुपेयिवान् ।
गर्भीकृतानत्र भाति विभासा सा परा निशा ॥
–तन्त्रालोके 6.116.

40. सा जडा भेदरूपत्वात्कार्यं चास्या जडा यतः ।
व्यापिनी विश्वहेतुत्वात् सूक्ष्मा कार्यैककल्पनात् ॥
शिवशक्त्यविनाभावान्नित्यैका मूलकारणम् । –तत्रैव 6.117

41. श्रीक्रमोदये पञ्चकञ्चुकानि पाशत्वेन वर्णिताः–
रागो माया कला विद्या नियतिः काल एव च ।
पञ्चकृत्याश्रयाः सर्वे पाशाश्चेति प्रकीर्तिताः ॥

42. तत्र काल-कला-नियति-राग-अविद्येति पञ्चकञ्चुकानां क्रमः परमार्थसारे, अनुत्तरप्रकाश-पञ्चाशिकायाम् (श्लो. 16) कला-अविद्या-राग-काल-नियतीनां क्रमः । ईश्वरप्रत्यभिज्ञा-

विमर्शिन्यां काल-विद्या-कला-राग-नियतिक्रमः । तन्त्रालोके (6.161) यत्स्पष्टमुदीरितम्-विद्या रागोऽथ नियतिः काल श्चैतच्चतुष्टयं कलाकार्यम् । अतः कलायाः पञ्चकञ्चुकेषु प्राथम्यं स्पष्टमास्थितम् । स्वच्छन्दतन्त्रोद्योतटीकानुसारं क्रमभेदस्याधारः पुरुषाणां प्रतीति-भेदनिमित्तकः । तथा हि कश्चन रागपूर्वकं जानाति, अन्यश्च ज्ञात्वा रज्यति ।

43. अयमेव परिमित आगमेषु पशुरिति प्रमाता दर्शनान्तरेषु जीव इति प्रथितः । "इदमेव च पञ्चविंशं पुंस्तत्त्वमित्युच्यते, यत् श्रीपूर्वशास्त्रेषु पुमानिति, अणुरिति, पुद्गलमिति चोक्तम् ।"

—तन्त्रालोकविवेके 6 पृ. 165

44. (क) तत्सर्वकर्तृता सा सङ्कुचितकतिपयार्थमात्रपरा ।
किञ्चित्कर्तारममुं कलयन्ती कीर्त्यते कला नाम ॥

—षट्त्रिंशत्तत्त्वसन्दोहे 8.

(ख) कला हि किञ्चित्कर्तृत्वं सूते स्वालिङ्गनादणोः ।
तस्याश्चाप्यणुनाऽन्योऽन्यं ह्यञ्जनं सा प्रसूयते ॥

—तन्त्रालोके 6.136

(ग) सेयं कला न करणं मुख्यं विद्यादिकं यथा ।
पुंसि कर्तरि सा कर्त्री प्रयोजकतया यतः ॥

—तत्रैव 6.142

45. सर्वज्ञताऽस्य शक्तिः परिमिततनुरल्पवेद्यमात्रपरा ।
ज्ञानमुद्भावयन्ती विद्येति निगद्यते बुधैराद्यैः ॥

—षट्त्रिंशत्तत्त्वसन्दोहे श्लो. 9

46. (क) रागोऽपि रञ्जयत्येनं स्वभोगेष्वशुचिष्वपि ।

—मालिनीविजयोत्तरतन्त्रे 1.28.

(ख) किञ्चित्कुरुते तस्मान्ननमस्त्यपरं तु तत् ।
रागतत्त्वमिति प्रोक्तं यत्तत्रैवोपरञ्जकम् ॥

—तन्त्रालोके 6 पृ. 157

(ग) न च तद्बुद्धिगतमवैराग्यमेव, तद्धि स्थूलं
बद्धस्य प्रमदायां न भवेदपि, रागस्तु भवत्येव ।

47. (क) नियतिर्ममेदं कर्तव्यं नेदं कर्तव्यमिति नियमनहेतुः ।

—पराप्रवेशिकायां पृ. 9.

(ख) नियतिर्नियोजयत्येनं स्वके कर्मणि पुद्गलम् ।

—मालिनीविजयोत्तरतन्त्रे 1.29.

(ग) नियतिर्नियोजनां धत्ते विशिष्टे कार्यमण्डले ।

—तन्त्रालोके भागे 6 पृ. 160.

(घ) नियच्छति भोगेषु अणूनिति नियतिः ।

—तन्त्रालोकविवेके भागे 6 पृ. 46.

(ङ) यस्य स्वातन्त्र्याख्या शक्तिः सङ्कोचशलिनी सैव ।
कृत्याकृत्येष्वंशं नियतममुं नियमयन्त्यभून्नियतिः ॥

—षट्त्रिंशत्तत्त्वसन्दोहे पृ. 12.

स्वातन्त्र्यम्

पूर्वपक्षतया येन विश्वमाभास्य भेदतः।
अभेदोत्तरपक्षान्तं नीयते तं स्तुमः शिवम्॥

ईश्वरप्रत्यभिज्ञाविमर्शिन्याम् 4. 1. 16

त्रिकदर्शनस्य शब्दार्थमनुसन्धाय तदैतिह्यं तस्यागममूलकत्वं, तदुपबृंहकं सोमानन्दोत्पलाभिनवगुप्तादिप्रणीतं वाङ्मयं, तदुपदर्शिता प्रमाणमीमांसा, षट्त्रिंशत्तत्त्वप्रकाशश्च परतत्त्वस्वरूपनिरूपणपुरस्सरं पूर्वं परामृष्टाः। परतत्त्वस्य सर्वैरात्मवादिभिः स्वयं प्रकाशता स्वीकारेऽपि तस्य स्वातन्त्र्यमागमैरेवानन्यमुखप्रेक्षितया साग्रहमुद्घोष्यते। अतः स्वातन्त्र्यसिद्धान्त एवागमानां महिष्ठं दर्शनम्।

कुत्र केन वा हेतुना शिवो ग्राह्य-ग्राहक-ग्रहणभेदभिन्नं विश्वमाभासयतीति प्रश्नं समाधातु त्रिकदर्शनं स्वाभिमतं स्वातन्त्र्यसिद्धान्तं प्रतिष्ठापयति। शिवस्य स्वातन्त्र्येण जगदिदं प्रकाशते आभासते वा। आभासितं सच्च प्रतिबिम्बतया चिदात्मनि सर्वदाऽवतिष्ठते। तदेतत् सर्वं प्राक्सूत्रितमपि किञ्चिद्विस्तरेण व्याख्यातुमयमारम्भः।

स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति (प्रत्यभिज्ञाहृदये पृ-2)

इत्याचार्याः सूत्रयामासुः व्याख्यां चक्रुश्च तत्रैव वृत्तौ–"स्वेच्छया न तु ब्रह्मवदादिवदन्येच्छया। तयैव च न तूपादानाद्यपेक्षया। एवं हि प्रागुक्तस्वातन्त्र्यहान्या चित्तमेव न घटेत्। स्वभितौ, न तु अन्यत्र क्वापि। प्राङ्निर्णीतं विश्वं दर्पणे नगरवदभिन्नमपि भिन्नमिवोन्मीलयति। उन्मीलनं चावस्थितस्यैव प्रकटीकरणमित्यनेन जगतः प्रकाशैकात्म्ये नावस्थानमुक्तम्।

शिवेन प्रकाशितं जगदिदं तस्मिन्नेवामिश्रं सत्सर्वदा स्थितमित्यपि शैवाः सम्प्रतिपद्यन्ते। तथा चोक्तम्–

अन्तर्विभाति सकलं जगदात्मनीह यद्वद्विचित्ररचनामुकुरान्तराले।
बोधःपरं निजविमर्शरसानुवृत्त्या विश्वं परामृशति नो मुकुरस्तथा तु॥

–(तन्त्रसारे पृ. 19)

निर्मले मुकुरे यद्वद् भान्ति भूमिजलादयः।
अमिश्रास्तद्वदेकस्मिंश्चिन्नाथे विश्ववृत्तयः॥[1]

–(तन्त्रालोके 3.4,)

यदमिश्रं स्वतन्त्रं भाति तद्बिम्बं, यच्चान्यव्यामिश्रत्वेनैव भाति तत् प्रतिबिम्बं मुखरूपमिव दर्पणे अन्यामिश्रं स्वतन्त्रं सद्भासमानं मुखं यथा (तन्त्रालोके 3.53)। यद्भेदेन भासितुमशक्तमन्यव्यामिश्रत्वेनैव भाति तत्प्रतिबिम्बं मुखरूपमिव दर्पणे (तन्त्रसारे पृ. 10) न केवलं रूपस्य शब्दस्पर्शरसगन्धानामपि भिन्ने स्वाधारेषु, यथा

स्पर्शस्यानन्दस्थानकन्दे, प्रतिबिम्बनं तन्त्रालोके (3. 24-26) प्रतिपादितं तच्च तत एवावसेयम् । प्रतिबिम्बिता पदार्थाः परस्परं दर्पणाच्च विभागेनैव भान्ति दर्पणेन तु तेषामविभागः । प्रतिबिम्बनं च दर्पणस्य मणेर्वा नैर्मल्यं प्रकटयति, कान्तमुखे स्वात्मानं प्रतिबिम्बितां दृष्ट्वा कामिनी प्रसादमनुभवति, सहृदयप्रमातृणां चेतश्च काव्ये नाट्ये च समुदायेन प्रतिबिम्बितं सदानन्दमनुभवति (तन्त्रालोके 3.6.29) । अतस्त्रिकदर्शनाभिमतः प्रतिबिम्बवादश्चिदात्मनैक्यमानन्दरूपतां च जगतः प्रतिपादयति । मुकुर-मायादीनामचैतन्यं, प्रतिबिम्बानामिव बिम्बानामपि नानात्वं, प्रतिबिम्बितानां पदार्थानामर्थक्रियाकारित्वाभावो भवन्ति । न पुनस्तथात्र निर्णेयम् । मुकुरमायाद्यपेक्षया प्रतिबिम्बाधारोऽत्र बोधरूपः, विश्ववैचित्र्यप्रतिबिम्बानां बिम्बाभावस्तथात्वे तस्यापि वैचित्र्येऽद्वैतहानिर्बिम्बानां च परिमितत्वे नवनवोन्मेषस्वातन्त्र्यसिद्धान्तभङ्गः स्यात्, विश्वप्रतिबिम्बानामर्थक्रियाकारित्वस्यास्वीकारे निरन्तरपञ्चकृत्यकारित्वं शिवस्य पराहतं भवेदतः प्रतिबिम्बानां बिम्बानि न सन्ति, अर्थक्रियाकारीणि च तानि प्रतिबिम्बानीति सिद्धान्तः स्वीकार्यः । अस्तु, संविदात्मनि विश्वोऽयं भाववर्गः प्रपञ्चवान् । प्रतिबिम्बतया भाति यस्य विश्वेश्वरो हि सः ॥

(तन्त्रालोके 3, 268)

सर्वोऽयं विश्वः शिवैक्येन स्थित इति शिवः सर्वाकृतिर्विश्वमयो वाऽभिधीयते । निराकृतिर्विश्वोत्तीर्णश्च शिवो विश्वावभासनवेलायां सर्वाकृतिर्भवति–

सर्वाकृतिर्विश्वमयो निराकृतिर्विश्वोत्तीर्णः ।

तन्त्रालोकविवेके 1.105

विश्वप्रतिबिम्बधारित्वाच्च विश्वात्मकत्वं भगवतः ।

(तन्त्रसारे पृ. 11)

अन्तःस्थितस्य विश्वस्य बाह्यत्वेनावभासः प्रकाशनमुन्मीलनमाभास उन्मेषो वेति शैवाः, विश्वस्योत्पत्तिरिति नैयायिकाः, परिणाम इति सांख्याः, विकार इति वेदान्तिनो जगदुः । प्रपञ्चस्य प्रमेयादिना प्रकाशने शिवस्यानुपहितमनन्यापेक्षि स्वातन्त्र्यं चकास्ति । विश्वस्य प्रकाशः, प्रकाशितस्य च तस्य स्वात्माभेदेन सर्वदा स्थितिस्तत्परामर्शश्च प्रकाशविमर्शात्मके कर्तरि ज्ञातरि च शिवे सर्वथा निर्दोषम् । स्वतन्त्रो हि कर्ता । स्वातन्त्र्यमेव मुख्यं कर्तृत्वम् । सर्वक्रियासु स्वातन्त्र्ये च सति जगत् केन हेतुना प्रकाश्यते, कथञ्च लीयते? इत्यादीनां प्रश्नानामपि समाधानं भवति । स्वातन्त्र्याभावे कर्तृत्वस्याभावस्तदभावे च कारणताया अभाव इति स्वातन्त्र्यमेव मुख्यो धर्मः । अत एवाहुः-

सर्वाः शक्तीः कर्तृत्वशक्तिरैश्वर्यात्मा समाक्षिपति,
सा च विमर्शरूपेति युक्तमस्या एव प्राधान्यम् ।

–ईश्वरप्रत्यभिज्ञाविमर्शिन्याम् 1. 2. 14,

तथा च तत्रैव–

चितिः प्रत्यवमर्शात्मा परा वाक् स्वरसोदिता ।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमेशितुः ॥
–(ईश्वरप्रत्यभिज्ञाकारिकायाम् 1.5.13)

इयमेव शक्तिः शक्त्यन्तराणि सर्वाणि समाक्षिपतीति प्रामुख्यमस्या एव । तथा चोक्तम्-

एक एवास्य धर्मोऽसौ सर्वाक्षेपेण विद्यते ।
तेन स्वातन्त्र्यशक्त्यैव युक्त इत्याञ्जसो विधिः ॥ –तन्त्रालोके । 107

शुद्धाध्वनि शिवस्य स्वातन्त्र्यं शक्तिरशुद्धाध्वनि च माया तत्स्वातन्त्र्यमभिव्यञ्जयतः ।

"माया च नाम देवस्य शक्तिरव्यतिरेकिणी ।
भेदावभासस्वातंन्त्र्यं तथा हि स तया कृतः ॥" (तन्त्रालोके 6.116)

एतदेव स्वातन्त्र्यं जगद्वैचित्र्यनिमित्तं न पुनरविद्या, माया, वासना वा ।[2] सृष्टेर्निमित्तं किमिति व्याख्यातुं स्वातन्त्र्यवादः, किंरूपा सृष्टिरिति प्रतिपादयितुं शिवाभासवादः, आभासितायाः सृष्टेः सदा चिदैकात्म्येन स्थितिरिति समाधातुं प्रतिबिम्बवादस्त्रिकदर्शनेनाश्रीयते । वस्तुतः स्वातन्त्र्यस्यैव स्थितिर्मदादिमाः संज्ञाः व्याख्यासौकर्यार्थमवलम्बिताः । कार्यरुपायाः सृष्टेः कारणे सन्ततं विद्यमानतां स्वीकृत्य सत्कार्यवादोऽपि स्वसिद्धान्तसंगत्या संभाव्यते । शिवस्यैव स्वेच्छया विचित्रेण रूपेण वर्तनमित्यर्थमुमापादाय विवर्तोऽयं प्रपञ्च इत्यप्युच्यताम् । का नो हानिः । "सोऽकामयत बहुस्यां प्रजायेय", आनन्दादध्येव खल्विमानि भूतानि जातानि", इन्दो मायाभिः पुरुरूप ईयते" "य एको जालवानीशते ईशनीभिः" इत्यादीनि श्रुतिवाक्यानि शिवस्वातन्त्र्यं चिदाभासवादञ्च स्वीकृत्य स्वरसानि भवन्ति । अतः श्रुत्यविरोधेनैव स्वातन्त्र्यसिद्धान्तः प्रतिष्ठापितः । पर तत्त्वं प्रपञ्चात्मना कथं स्फुरति? कश्च प्रपञ्चस्य परतत्त्वेन सह संबन्धः ? परतत्त्वस्य सत्यत्वेऽपि प्रपञ्चस्य किं रूपमित्यादीन् प्रश्नान् समाधातुं भारतीयदर्शनेषु विविधा वादा विद्यन्ते । तत्र सांख्याः सुखदुःखमोहात्मकं सर्वं वस्तु सत्त्वरजस्तमोगुणानां साम्यावस्थायास्त्रिगुणात्मिकायाः प्रधानकारणभूतायाः प्रकृतेर्विकृतिरिति प्रतिपद्यन्ते । सा च प्रकृतिरचेतनापि कर्त्री चेतनपुरुषसान्निध्याद् जगदात्मना परिणमते । सोऽयं परिणामो वास्तवः समनुगतश्च। सती प्रकृतिः सदात्मना परिणमत इति प्रकृतिवद् विकृतेरपि वस्तुसत्यत्वम्, अन्योन्याभिभवाश्रयजननमिथुनवृत्तीनां त्रयाणां गुणानां परस्परोपमर्दकत्वेऽपि सहावस्थानाद् मानवस्वभावस्य वैचित्र्यम्, वस्तूनां च बहुरूपत्वम्, समनुगतत्वं सुखदुःखमोहात्मकतया प्रपञ्चस्य पार्यन्तिकं वस्तुभिन्नं गुणरूपत्वं च कापिलैरास्थीयते साध्यते च । प्रपञ्चः प्रकृतेः परिणाम इति, कार्यं च सदिति व्यवस्थापनात् सांख्यानां पक्षः प्रकृतिपरिणामवाद इति सत्कार्यवाद इति च भण्यते । अथेयं प्रकृतिः

प्रपञ्चसृष्ट्यर्थं केन हेतुना प्रवर्तते? विवेकज्ञानेन करणेन प्रतिपुरुषविमोक्षार्थमिति चेत्? किमिदं विवेकज्ञानं पूर्वतः सदसद्वेति प्रतिप्रश्नः परिस्फुरति । सच्चेत्? प्रवृत्तेर्वैयर्थ्यापत्तिः असच्चेन्मूलहानिः । न हि भवतां पक्षे किञ्चिदसद्भवति; सच्चात्मानं जहातीति सर्वार्थानां सम्भवात् प्रधानं किमर्थं प्रवर्तत इति वक्तव्यम् । प्रवृत्तेर्निमित्तमभिव्यक्तिरिति चेत्? साऽप्यभिव्यक्तिः प्राक् प्रवृत्तेः सती आहोस्विदसतीति पूर्ववत् पङ्कप्रसङ्गः ।

अचेतना च प्रकृतिः सविवेकं निर्विवेकं वा प्रवर्तते । आद्ये पक्षे प्रयोजनचिन्तायाश्चेतनधर्मत्वात् प्रकृतौ तन्न सङ्गच्छते, द्वितीये पक्षे "वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य"[3] इत्युक्तदिशा प्रवृत्तेः सांसिद्धिकत्वस्वीकारे प्रकृतेः परिणामे सर्वसंविद्गोचरः क्रमः कस्मादाविर्भवति, व्युत्क्रमश्च कथं नोदेतीति समाधेयम् । कस्माच्च सृष्टिः प्रयोजनवतीत्याश्रीयते? सर्वं चेदं स्वभावसिद्धमिति स्वीकारे कथं न स्वभाववादः शरणीक्रियते? कस्मादिदं निर्हेतुकं निष्कामं च प्रकृतिसमालिङ्गनं विधीयत इति प्रतिब्रूमः । ततश्च "स्वार्थ इव परार्थ आरम्भः"[4] "या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य"[5] इत्यादिवाचोयुक्तिरपि न क्षोदक्षमतां सहते । पुरुषमोक्षविचारस्तदर्थं प्रवृत्तिर्दर्शनगोचरतावबोधे च सति प्रपञ्चोपरतिरित्यादिकं सर्वं चेतनेनैव नियम्यते, न पुनरचेतनेन । अचेतनस्य प्रधानस्य अचेतनोऽयं प्रपञ्चात्मा परिणामश्चेतनाचेतनात्मिकामुभयां कोटिमाटीकत इत्यप्यसमञ्जसमेव ।

कणभुगक्षपादानुयायिनः सतः कारणादसत् पूर्वमविद्यमानं प्रागभावप्रतिबन्धकाभावावच्छिन्नमेव कार्यमुत्पद्यत इत्यसतः सज्जायत इत्याचक्षते । सर्वोऽर्थश्च तेषां मतेन आरम्भः ।

न्यायवैशेषिकमते च परमाण्वादीनि सन्ति कारणानि कार्याण्यसन्ति आरभन्ते । अचेतनानि हि कारणानि परमाण्वादीनि कार्यं च चेतनाचेतनोभयविशिष्टं भवति । विशेषश्च गुणात्मा । चैतन्यमचैतन्यं वा गुणस्तस्मिंश्च द्रव्ये समवेते सति द्रव्यं चैतन्यवदित्युच्यते । सत्कारणमचेतनम्, कार्यं च स्वभावतोऽचेतनं समवायिभिर्गुणैः संयुक्तं सच्चेतनं व्यपदिश्यते । पृथिव्यप्तेजोवाय्वाकाशादिद्रव्याणां मध्यान्तःपातित्वाद्[6] द्रव्यत्व-सामान्यधर्मावच्छेदकत्वाच्च न्यायवैशेषिकमते आत्मापि स्वतोऽचेतनः, केवलं चेतनस्य ज्ञानस्य वा अधिकरणत्वात्[7] तेन गुणेन सहायुत्तसिद्ध्यवस्थानाच्चेतन इति व्यवह्रियते । चैतन्येन समवेतश्चात्मा बद्धावस्थायां व्यवहारदृशा सर्वदैव चेतनो भवति, यथा हि न्यायनयेन वह्निरनुष्णः सन्नप्युष्ण इति । सोऽयं गुणसमवायो मुक्तावस्थायामेव व्यपगच्छति; तदानीमात्मनः स्वस्वरूपलाभात् । स्वरूपलाभे च गुणेभ्यो वियोगे सति ज्ञानाधिकरणतां हित्वा पाषाणवदात्मा भवतीत्यास्थेयमेव । अत एव कश्चन परमभागवतो वैशेषिकीं मुक्तिं प्रयच्छमानामपि न कामयते, दूरतो जहाति । ब्रूते च-

वरं वृन्दावनारण्ये शृगालत्वं भजाम्यहम् ।
न पुनर्वैशेषिकीं मुक्तिं प्रार्थयामि कदाचन ॥

पदार्थोत्पत्तेर्द्वितीय एव क्षणे गुणेन योगो विनश्यदवस्थायां च तद्वियोग इति चेतनतया व्यपदिश्यमानः पदार्थ आद्ये क्षणे निर्गुण एव तिष्ठतीत्यचेतनं सत् पूर्वतोऽविद्यमानमचेतनान्तरमसज्जनयति आरभते वेति न्यायवैशेषिकवाचां विवेकः। एतेन फलितं यन्नैयायिका अपि सांख्या इव अचेतनं कारणमचेतनं च कार्यं व्यवस्थापयन्ति । अयमेव तु तेषां सांख्येभ्यो विशेषो यदत्राचेतनस्याचेतनत्वेन परिमाणो नाङ्गीक्रियते, अपि त्वारम्भ एव । अतो यदि सांख्यानां मतमचेतनपरिणामवादो विद्यते, तर्हि न्यायवैशेषिकानां मतमचेतनारम्भवाद इत्याख्यातुं प्रभूयते । परं वंस्तुदृशा सूक्ष्मपर्यालोचनया वाऽनयोः कियान् भेदः ? किमारम्भवादं स्वीकुर्वन्तो नैयायिका वन्ध्यायाः पुत्रोत्सवमिव मन्यन्ते ? किं शून्यादेव यस्मात् कस्माच्चित् यत्किमपि प्रादुर्भवति ? तर्हि किमर्थमुपादानापेक्षा, किमर्थं च शक्तस्यैव शक्यकरणम् ? किमर्थञ्च नासतो विद्यते भावः ? तदत्र ते ब्रुवते, कार्यस्योत्पत्तेः प्राक्तत्प्रागभावो भवति ।

यथा हि घटस्योत्पत्तेः पूर्वं तत्प्रागभावः, अभावश्च तदनुयोगिप्रतियोगिचिन्तामन्तरा किं सम्भवतीति प्रश्ने, नेति नेति नैयायिकाः सावष्टम्भं सिद्धान्तयन्ति । घटप्रागभावप्रतियोगिनो घटस्य सत्त्वमादायैव स्वप्रतियोगिनं कुक्षौ कृत्वैव घटप्रागभाव आत्मपदं लभते । एवञ्च यदि कार्यस्य प्रतियोगिरूपेण चिन्तात्मिका सत्ताऽस्त्येव तर्हि को वाऽऽरम्भ आरम्भ इति जुघुष्यते? कथं न परिणाम एव किञ्चिद्भेदेनोरीक्रियते? आरम्भःकारणात् कार्यं विशिनष्टि, कार्यं च पदार्थान्तरम् । अभिधेयत्वं ज्ञेयत्वं प्रमितिविषयत्वं च पदार्थसामान्यलक्षणमित्यभ्युपगमादिति चेत्? भवतु अवान्तरः कश्चन भेदो व्यवहारप्रतिपादने, न त्वैतावता "अचेतनमचेतनत्वेनैव सम्पद्य प्रपञ्च इत्यभिधीयते । अचेतनपरिणामवादस्यैव किञ्चिद्भेदेनाऽचेतनारम्भवादो नामान्तरम्" इत्यस्मन्मतं प्रत्यवस्थेयम् । परिणाम आरम्भश्च कारणस्य कार्यतापादसम्बन्धिनीं प्रक्रियामेव विशेषयतो न पुनस्तयोः समानमचेतनरूपत्वम् । प्रतियोगिनश्चाभावे स्मरणादन्वितत्वाद्वा आरम्भवादोऽपि सर्वथाऽसन्तमर्थं न लक्षयति, किन्तु प्रागभावप्रतिबन्धकाभावयोरवश्यं स्वीकर्तव्यत्वादर्थस्य स्फुरणमभिप्रैति । अर्थस्य स्वोत्पत्तिपूर्वक्षणे विजृम्भणमेव सत्तानुबन्धित्वम् । न्यायदृशाऽपि सत्तासामान्ययोगस्य व्यवहारकालेऽविघटित्वात् सर्वथाऽसन्नर्थ इति वक्तुं न पार्यत इत्येवं स्वरूपतोऽचेतनोऽयं प्रपञ्चोऽचेतनस्यैव कारणस्य क्रमेण प्रकृतेः परमाण्वादेर्वा परिणाम आरम्भो वेति सांख्यानां न्यायविदां चालोचनलभ्यः सिद्धान्तः फलति, कारणमचेतनं कार्यमपि तथैवाचेतनमिति व्यवस्थाया उभयत्र तुल्यत्वात् ।

"सत्यं ज्ञानमनन्तं ब्रह्म"[8] "एकमेवाद्वितीयम्"[9] "सर्वं खल्विदं ब्रह्म" "नेह नानास्ति किञ्चन" इत्यादि वेदान्तवाक्यकुसुमलक्ष्म्यावर्जितहृदया वेदान्तिनस्तावदत्र विषये किं

ब्रुवते? ब्रह्मज्ञानमर्थाच्चेतनम्, स्वरूपतश्चेतनम्, न पुनः केनचिदागन्तुकेन धर्मेण चैतन्यात्मना तथा भवति, न वा कस्यचिच्चेतनस्य सान्निध्येन चेतनवदिव प्रतिभाति। तदेव च चेतनं ब्रह्म कारणमतो वेदान्तिनामध्वनि चेतनं कारणं व्यवस्थितम् । किं रूपञ्च विषयविषय्यात्मकं कार्यम् । तद्रूपं तद्भिन्नं वा? तद्रूपत्वे तदात्मकत्वे वा जगतश्चेतनत्वं पर्यवस्येत् । तद्भिन्नत्वे च ब्रह्मणि द्वैतकक्ष्याधिरोहः । अक्षिणी निमील्य कार्यं जगन्नास्ति, नास्तीति शङ्करोऽपि न ब्रूयात् । यतो हि स्वयमेव प्रपञ्चस्यैव सर्वलोकप्रत्यक्षत्वं स्वकण्ठत एव प्रत्यपीपदत्–"एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः" । अद्वितीयमेकं च ब्रह्म चेतनाचेतनव्यपदेशपतितस्यानन्तकर्तृभोक्तृसंयुक्तस्य विचित्ररचनाप्रपञ्चस्य संसारस्य मध्ये कथमात्मानं पातयति? कथं तदात्मना परिणमते? इति प्रश्नेऽविद्याकृतोऽयं कर्तृत्वभोक्तृत्वभेदो मायीयश्चायं विचित्ररचनाप्रपञ्चः सत्यासत्यविलक्षणां मिथ्यारूपां कोटिं स्पृशतीति शाङ्करा जगदुः । किन्त्वेकस्यैवानन्तत्वम्, "सर्वं खल्विदं ब्रह्म" इति च प्रतिश्रुतवत्य उपनिषदः सर्वस्य प्रपञ्चस्य ब्रह्मरूपत्वमेवोद्घोषयन्ति । 'नेह नानास्ति' श्रुतिरपि न पूर्वां श्रुतिं विरुणद्धि । ब्रह्मात्मकतया ज्ञातस्य प्रपञ्चस्य "सर्वं खल्विदं ब्रह्म" इति चिन्तनया तदात्मकत्वेन व्यवस्थापितस्य सर्वस्य ब्रह्माभिन्नत्वाद् नानारूपेण नानात्वपर्यवसिना स्वरूपेण, अर्थाद् ब्रह्मभिन्नतया प्रपञ्चस्य सत्त्वं नास्तीत्येतावदेव "नेह नानास्ति किञ्चन" इत्यादीनां श्रुतिवाक्यानां स्वारस्यम् । तत एव नेतिनेतिश्रुतीनामुत्तरत्वम्, अन्यासां च ब्रह्मात्मत्वप्रतिपादनपराणां पूर्वत्वम् । अपवादोऽप्यध्यारोपं पुरस्कृत्यैव प्रवर्तते । पुनश्चैकमनन्तमव्ययं ब्रह्म जगदात्मना भ्राजमानं कथं विकृतमिति दोषेण दूष्यते । अनन्तस्यानन्तत्वेन स्थितौ नैकत्वं न वाऽखण्डितत्वं परिभूयेते । नानारूपत्वेऽप्येकत्वमित्येतावानेवाद्वितीय शब्दस्याभिप्रायः ।

एतेन नानारूपस्य नामरूपात्मकतया विभक्तस्य प्रपञ्चस्य ब्रह्मरूपत्वं साधितं भवति, तस्यानन्तत्वात् पूर्णत्वादव्ययत्वाच्च । पूर्णमनन्तमेकं सदपि नानात्वेन परिस्फुरतीति स्वीकारे का वो हानिः? कथं वा ब्रह्मणि विकारप्रसङ्गः? पूर्णस्य पूर्णत्वग्रहणेऽपि पूर्णत्वं तु तदवस्थमेव । तथा च श्रूयते–

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

पूर्णं ब्रह्म प्रपञ्चात्मना सन्न खल्वपूर्णतामेतीति कथमपार्थकमेव मायावादमाश्रित्य सहजसुभगमद्वैतं द्वैताभासतां नीयते । द्वैतकक्ष्याधिरोहाद्धि मूलस्यैव नाशः । उपनिषदामेवंविधमभिप्रायं प्रायेणान्यथाव्याचिख्यासन्तो वेदान्तकेसरिणः स्वमाया कान्तार एव विप्रलब्धाः सन्तो द्विविधं कार्यकारणवादं व्यवस्थापयन्ति । एकस्तु विवर्तवादः, अपरश्च परिणामवादो विकारवादो वा । तत्र"

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथा प्रथा विवर्त्त इत्युदीरितः ॥"

अथवा-"कारणसलक्षणोऽन्यथाभावः परिणामस्तद्विलक्षणश्च विवर्तः" इति हि प्रसिद्धे लक्षणे विवर्तपरिणामयोः। ब्रह्मणश्च विवर्तोऽयं प्रपञ्चो मायायाश्च परिणाम इति खलु ते संगिरन्ते। सेयं माया सती, असती तदुभया, तदनुभया वेति नेदं वयमत्र विवेचयामहे, किन्तु पारमार्थिकं सत्यत्वं ब्रह्मण इव मायाया नास्तीत्युभयवादिसम्भवमेवाचक्ष्महे। इत्येवं परं कारणं ब्रह्म, तच्च चेतनम्, जगच्च चेतनमचेतनञ्च। चेतनं कारणं कार्यं चांशतश्चेतनमित्युभयत्राप्येकदेशे समानलक्षणत्वात् कारणत्वलक्षणोऽन्यथाभावो ब्रह्मण इति विवर्तवादस्तथैव सुकरः। प्रपञ्चस्य नानात्वदृशि विवर्तवादः एकत्वदृशि च परिणामवादः प्रत्येय एव। सर्वत्रैव दर्शनेषु प्रपञ्चस्य किञ्चिद्भेद आसाक्षात्कारं परिस्फुरत्येव। पार्यन्तिकाद्वैतदृष्ट्यभ्युपगमेऽपि व्यवहारे ब्रह्मणो भिन्नतया परिस्फुरन् प्रपञ्चः कथं वा कोऽपि तथा नास्तीति निवार्येत। यथा हि कश्चन चन्द्रमेकं जानानोऽपि दोषवशाद् द्विचन्द्रप्रतीतिं पारवश्यादभ्युपयाति, तथैवाधिगतार्थोऽपि तत्त्वज्ञो व्यवहारस्य परतत्त्वेन सहाभेदाभ्युपगमेऽपि प्रत्यक्षे प्रपञ्चस्य भिन्नतया प्रतीतेः स्खलद्गतिर्भवति।

ज्ञानेन साधिताऽपि प्रतीतिः परिस्फुरता व्यवहारेण परिबाध्यते। स्खलन्ती चेयं ज्ञानगतिरद्वैतेऽपि द्वैतमवभासयति, इति विवर्तवादो ह्यनधिगतसाक्षात्काराणामेव कारणवैलक्षण्यप्रतिपादकः सिद्धान्तः। वैलक्षण्याभ्युपगमे हि संसारस्य किं नाम क्षीयते, एतेन हि परतत्त्वस्यैव परमाद्वैतं विकलीक्रियते। अथ ब्रह्मणः परिणामस्वीकारे न तथा दोषावकाशः। कामं किमप्याश्रीयताम्—ब्रह्मापेक्ष्यैव प्रपञ्चः परिणामो विवर्तो वेति व्याख्येयम्, अन्यथा द्वैतं महता प्रयत्नेन निवारितमपि गृहान्नापैति। अथ वन्ध्या पुत्रवत् प्रपञ्चस्य सर्वथाऽसत्यत्वं तदंशे च मायापरिणामित्वं तु न कोऽपि प्रत्येति तथा चोक्तं माण्डूक्यकारिकायाम्

असतो मायया जन्म तत्त्वतो नैव युज्यते।
वन्ध्यापुत्रो न तत्त्वेन मायया वापि जायते॥ (3.28)

एतेन मायापरिणामवादस्तु सर्वथा निराकृतो भवति। "सर्वं खल्विदं ब्रह्म" इति श्रुतिवाक्यं श्रद्दधानैरस्माभिः प्रपञ्चस्य यदा ब्रह्मरूपत्वमास्थीयते तदा विवर्तवाद इत्युभयथापि कारणं चेतनमेव, तस्य च प्रपञ्चेन सलक्षणविलक्षणात्मकश्च सम्बन्धः। अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततः परम्। वेदान्तिनां चेतनपरिणामवादश्चेतनविवर्तवादो वा सांख्याचार्याणामचेतनपरिणामवादात्, नैयायिकानां चाचेतनारम्भवादान्निकामं भिन्न इत्यत्रैवास्माकमधुना हृदयम्।

वेदान्तेषु चेतनं कारणं कथं चेतनाचेतनत्वेन प्रतिभातीति प्रश्नपरिणामशङ्कितधिय आचार्या उभयथापि प्रतिपद्यन्ते। तद्रूपं तद्भिन्नञ्च, कारणसलक्षणं कारणविलक्षणं च जगदिति। कारणं तु प्रायेण एकमेवामनन्ति। द्वैतवासना-

वासितहृदयास्तु वेदान्तैकदेशिनो मायायाः ससम्भ्रमालिङ्गनसुखेनाद्वैतं विस्मारयन्ति। माया कारणं जगच्च तत्कार्यमिति स्वीकारे ब्रह्मणःपरमकारणता किञ्चित् परिहीयते। किंकारणमिति प्रश्ने ब्रह्मेति ब्रह्मविदां श्वेताश्वतरोपनिषदि सम्यगाम्नातमुत्तरम्।

"यतो वा इमानि भूतानि जायन्ते, येन जातानि यत्प्रयन्त्यभिसंविशन्ति" (तैत्तिरीय० 3.1), "तज्जलानिति शान्त उपासीत," आत्मा वा इदमेक एवाग्र आसीत्। नान्यत्किञ्चन मिषत्। स ईक्षत लोकान्नु सृजा इति। स इमाँल्लोकान-सृजत।" (ऐत० 1. 1. 1) इत्यादीनि श्रुतिवाक्यानि, "जन्माद्यस्य यतः" (1. 1. 3), "तत्तु समन्वयात्" (1. 1. 4) "आत्मनि चैवं विचित्राश्च हि" (2. 1. 28) "तदनन्यत्वारम्भणशब्दादिभ्यः" (2.1.14), "कारणत्वेन चाकाशादिषु यथाव्यप-दिष्टोक्तेः" (1.4.14), "योनिश्च हि गीयते" (1. 4. 27.) इत्यादीनि वेदान्त-वाक्यकुसुमग्रथनार्थानि ब्रह्मसूत्राणि च ब्रह्मण एव कारणतां साक्षात् प्रतिष्ठापयन्ति। प्रतिपक्षाभ्युपगतानि प्रकृत्यादीनां कारणताप्रख्यापकानि मतानि निराकुर्वद्भिश्च सूत्रैः सर्वथा तदेव ब्रह्म कारणान्तरनिरासेन समर्थ्यते। नैतत्सर्वं मतं शास्त्रार्थं कलुषीकर्तुं प्रत्यवस्थेयम्। जगतो हि कारणविलक्षणत्वस्वीकारे भेदबुद्धिर्दुरुद्धारतया उत्तानधियं वेदान्तिनं भ्रमयतीत्यपि प्रेक्षावतां न विशिष्य निवेदनीयं भवेत्, विदितवेदितव्या हि ते भवन्ति। अत एवाहुरभिनवगुप्तपादाः- "मायापदं हि सर्वं भ्रान्तिस्तत्रापि तु स्वप्ने स्वप्न इव गण्डे स्फोट इवापरेयं भ्रान्तिः।"

त्रिकदार्शनिका वेदान्तिनां जगन्मिथ्यात्ववादं नाद्रियन्ते। "सर्वथा यथा यत्प्रतिभातं तन्नान्यथा कर्तुं शक्यत इति सत्यमेव न किञ्चिन्मिथ्यात्वम्" इति शिवदृष्टिवृत्तौ (पृ. 30) अन्तश्चिद्वृत्तौ प्रकाशमानं बहिरसदपि 'अवस्तु' चिद्रूपतया सत्यमेव। तदुक्तं तत्रैव—"अवस्त्वपि प्रकाशमानं चिद्रूपमेव केवलं बाह्ये प्रकाशनाभावादवस्तु उच्यते।" भेदप्रथारूपा माया शिवस्य स्वातन्त्रमभिव्यनक्तीति न तया चित्प्रतीपस्य मिथ्यात्वस्य सिद्धिः। अत एवाहुः शिवदृष्टौ सोमानन्दनाथाः—

विश्वस्यासत्यरूपत्वं यैर्वाक्यैर्वर्णितं क्वचित्।
शिवोक्तैस्तैर्विरोधः स्यात् सर्वसत्यत्ववादिनः॥ (3-32)

संसारस्यासारत्वमोहभ्रमात्मकत्वं प्रतिपादयन्ति वाक्यानि वैराग्यजननार्थं पूर्णता-प्रत्यभिज्ञोपदेशार्थं वोन्नेयानि। द्विचन्द्रवत्संसारस्यासत्यता नास्ति, संवृतिसत्यत्वात्। संवृतिर्हि विकल्पबुद्धिस्तद्वशादुच्यतां संवृत्तिसत्यत्वं सत्यत्वस्यैव तु प्रकारस्तत्।" — (**ईश्वरप्रत्याभिज्ञाविमर्शिन्याम्** 2. 2. 3)

इत्येवं सर्वोयं प्रपञ्चः प्रकाशः परमेशितुः। अन्तःस्थितस्यैव च बाह्यत्वेनाभासः प्रपञ्च इत्यभिधीयते। आभासश्चार्थक्रियाकारी क्षणिकश्च। परं तेन क्षणिक-विज्ञानवादशून्यवादयोर्भिन्नत्वमपि स्फुरति, क्षणिकज्ञानानामपि चिदेकविषय-त्वात्सर्वदा च चिदैकात्म्यात्। प्रकाशात्मना प्रपञ्चेन सह सर्वदा शिव एकात्मा। षट्त्रिंशत्तत्त्वात्मना प्रविभक्तं जगच्छिवरूपेण सदा स्फुरति। शैवशासनये प्रपञ्चस्य

शिवैकरूपत्वात् चेतनत्वं वास्तवत्वञ्च सिद्ध्यतः । जडवस्तुषु घटपटादिषु हि स्वातन्त्र्यं कर्तृत्वपर्यायं न भवति । तत एव तेषां तेन रूपेण सर्वदाऽवस्थानं भवति । किन्तु शिवस्तु महेश्वरादनन्तरूपेणात्मानं प्रकाशितुं सर्वथा समर्थः । न चानेन तस्मिन् विकारः शङ्कनीयः । इदं तु तस्य स्वातन्त्र्यमेव प्रख्यापयतितमाम् । अत एवाहुः–

अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः ।
महेश्वरत्वं संवित्त्वं तदत्यक्षद्धतादिवत् ॥[10]

–भास्कर्यामुद्धृतम् 1. 145,

जडस्वभावा हि घटपटादयः स्वात्मानं रूपान्तरेणावभासयितुं न शक्नुवन्ति । वेदान्तिनां ब्रह्मणोऽपि जगदात्मना प्रकाशास्वीकारात् स्फटिकादिसन्निभं जडत्वमेव फलति । मायापरिणामवादस्वीकारे हि ब्रह्मणः स्वातन्त्र्यं परिहीयते । स्वतन्त्रश्च शिवो महेश्वरसारतामेव प्रख्यापयति । अत एवाहुः– "स्वतन्त्रशब्दो ब्रह्मवादवैलक्षण्यमाचक्षाणश्चितो माहैश्वर्यसारतां ब्रूते ।" (**प्रत्यभिज्ञाहृदये पृ.** 25)

प्रपञ्चस्य प्रकाशात्मतास्वीकारे सर्वेषामर्थानां चेतनत्वं पर्यवस्यति ।[11] कथं न घटपटादयश्चेतनत्वेनाभासन्त इति परिप्रश्ने परमार्थतश्चेतना अपि भावा अचेतनतया शिवेच्छया स्फुरन्तीति समाधानम् । गूढमव्यक्तं च चैतन्यं सर्वेषु जडत्वने व्यपदिष्टेषु भावेषु वर्तते । तच्च चैतन्यं समाहितचेतसां योगिनामेव परिस्फुरति, न मितदृशामस्मादृशां चेति समाधानम् । तथा हि लोके जडत्वेन परिचायितानि पत्रपुष्पाणि विज्ञानस्फारवता वैज्ञानिकेन विदुषा चेतनानीति वैज्ञानिकोपकरणोपस्कृतया सूक्ष्मेक्षिकया दृश्यन्त एव । जडादिद्रव्ययोः परस्परं परिवर्तनं चेतनाचेतनविभागं खण्डयति । पुनश्च योऽयं दुर्घटइव विषयविषयिविभागश्चेतनाचेतनभेदो वा शाङ्करैराश्रीयते स द्वैतमेव पुष्णाति । यदि तमःप्रकाशवद् विरुद्धस्वभावौ विषयविषयिणौ तर्हि तौ समन्वयं कथमुपयातः? विरोधश्च तयोर्दुष्परिहरःस्यात् ।

न हि पृथक् पृथक् परिक्षीणेषु स्रोतस्सु तदुह्यमानास्तृणोपलादयः समन्वयं कञ्चिद् यान्ति । **(भास्करी)**

पाश्चात्यदर्शनजगति विषयविषयिणोरेकप्रवृत्तिः परस्परम्बन्धश्च कथं भवतः? इति समस्याऽद्यापि समाधानं न प्राप्नोति । जडचेतनरूपेण भेदस्वीकारे अस्या समस्यायाः समाधानं कथञ्चिदपि न सुशकम् । जडचेतनयोरात्मानात्मनोरिदमहमयोर्विषयविषयिणोर्वा तमःप्रकाशवद्विरुद्धस्वभावस्वीकारे तयोः सम्बन्धस्य समन्वयस्य च समस्या कदापि नापेयात्, भेदवादश्च पतेदिति कोऽयं मोह उभयोर्भेदाग्रहे? आत्मस्वरूपं चैतन्यमेव बाह्याभासनावस्थायां ज्ञानं तदेव चार्थत्वेनेदंतया बहिरन्तः-प्रकाशत इति स्वीकारे सर्वं समञ्जसं भवति ।

तत्तद्रूपतया ज्ञानं बहिरन्तःप्रकाशते ।
ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत् ॥
न हि ज्ञानादृते भावाः केनचिद् विषयीकृताः ।
ज्ञानं तदात्मतां यातमेतदस्मादवसीयते ॥ (शिवसूत्रविवरणे 32)

परतत्त्वं चेतनं द्वैतं च तस्मिन्नास्तीति सिद्धान्तितेऽपि कथं व्यामुह्यते? विषय-विषयिणोर्विरुद्धो विभागश्चास्थीयते? शैवास्तु सर्वं प्रकाश्यं प्रकाशरूपमिति किञ्चिदपि नाप्रकाशमिति[12] स्वीकुर्वाणा व्यवहारेऽपि परमाद्वैतमेव प्रतिष्ठापयन्ति ।

नीलं पीतं सुखमिति प्रकाशः केवलः शिवः ।
अमुष्मिन् परमाद्वैतप्रकाशात्मनि कोऽपरः ।
—(भास्कर्यां प्रथमे भागे पृ. 52)

सर्वेषां वस्तूनां विमर्शात्मक प्रमातृस्वभावेन सह तादात्म्याच्चैतन्यमेव भवति। तदेवाहुः—

"सर्वत्र वस्तुतो विमर्शात्मकप्रमातृस्वभावतादात्म्याहंपरामर्शविश्रान्तेरजडत्वमेव पूर्वापरकोट्योः ।" संविदा सह तादात्म्यापत्तिरेव हि चैतन्यव्यपदेशं लभते । इत्येवं देहसुखनीलपीतात्मकः सर्वोऽयं प्रपञ्चः प्रकाशमानत्वात्, अध्यवसायविषयत्वात्, स्मर्यमाणत्वात् सङ्कल्पितत्वात् संविद एव भित्तिभूततां प्रख्यापयति ॥[13] संविदः स्फुरणे एव सर्वं स्फुरति, तदस्फुरणे च न किमपि स्फुरतीति संविदा सह, शिवेन सह, सर्वदा एकीभावः प्रकाशितो भवति । प्रकाशविमर्शात्मकस्य शिवस्य प्रकाशः परायाः संविदः आभासः, रहस्यदृशा वा वामेश्वर्या एव वमनं सर्वोऽयं प्रपञ्चः—

चितिशक्तिरेव भगवती विश्ववमनात् संसारवामाचारत्वाच्च वामेश्वर्याख्या सती··· ।"

—प्रत्यभिज्ञाहृदये पृ. 60;

अहमिदमोर्विषयविषयिणोर्जडचेतनयोर्व्यवहारार्थं भेदाभिधानेऽपि तयोरेकात्मता-रूप आन्तरः सम्बन्धः स्वीकार्यः । सम्बन्धस्वरूपं व्याचक्षाणः उत्पलदेवः सम्बन्ध-सिद्धौ सम्बन्धिनः सहार्थवृत्तितां समानार्थवृत्तितामेकदेशावस्थानार्थेन लक्षयित्वा सम्बन्धस्य न्यायसम्मतं सम्बन्धिभिन्नत्वं खण्डयामास । तथा हि **"संशब्देन सहार्थवृत्तिना समानवृत्तिना वा बन्धिना च देशान्तरपरिहारपूर्वकैकदेशावस्थानार्थेन····· जडचेतनादिरूप-तया सम्प्रतिपन्नेऽपि व्यावहारिकविभागेऽस्त्येव जडाभासस्य चिदाभासस्य चैकात्मतारूप आन्तरः सम्बन्ध इति निष्कृष्टार्थः ।"**

आभासश्च न खल्वन्यथाभावः प्रत्युत अन्तःस्थितस्यैव बहिः प्रकाशनम्, उन्मेषः, उन्मीलनं वा । उन्मेषश्च सांख्यानां विकृतिलक्षणात् परिणामात्, योजनवियोजन-जन्याच्च नैयायिकानामारम्भात्, वेदान्तिनां चान्यथाप्रथनरूपाद् विवर्तात् सर्वथा भिद्यते । प्रकाशो ह्यत्र स्वतन्त्रायाः संविदः स्वीकृतो न पुनरचेतनायाः प्रकृतेः । पुनश्च परिणामे गुणानां साम्यं वैषम्यमुपैति, किन्तु शैवशासननये स्वतन्त्रः शिवः

स्वस्वातन्त्र्येणाविकृतः सन् तत्तद्रूपेण स्वात्मानं प्रकाशयतीत्यत्र न वैषम्यावकाशः। शिवप्रकाशश्च अचेतनारम्भात् सर्वथा विभिद्यते, नायं प्रपञ्चोऽचेतनोऽचेतनकृतो वा जन्योऽपि नास्ति। अन्तःस्थितस्यैव बाह्यत्वापादनं हि प्रकाशः। वेदान्तिनां ब्रह्म चेतनं सदपि न स्वेच्छया स्वात्मानं जगदात्मना प्रकाशयति, तस्मिन् स्वातन्त्र्या-स्वीकारात् कर्तृत्वं नास्ति। शिवस्तु स्वतन्त्रः कर्ता। तस्य प्रकाशश्च न खल्वन्यथा-भावः, न वा भ्रमः न वा परमार्थतो विरुद्धधर्माक्रान्तिः। चेतनस्य चेतन एवायमव-भासः। अवभासश्च सत्ता। स हि स्वभावः परमेशितुः। यदि शिवस्तत्तद्रूपेण स्वातन्त्र्येण न प्रकाशेत् तर्हि स्फटिकादिजडोपम एव स्यात्।[14] सत्येऽपि ज्ञानेऽपि ब्रह्मणि कर्तुमकर्तुमन्यथाकर्तुं च स्वातन्त्र्यस्यानभ्युपगमाद् वस्तुदृशा तज्जडमेव सिद्ध्यति। तस्य 'सर्वज्ञं सर्वशक्ति' इति वचनमपि न सुप्रतिष्ठं भवति। यदि सर्वं नास्ति तर्हि कस्य ज्ञता? यदि धर्मा न सन्ति तर्हि कथङ्कारं तत्सर्वशक्तीत्यभिधीयते? यत्र सर्वं कर्तुं स्वातन्त्र्यं नास्ति तस्य कुतो हि सर्वं स्यात् मायाविजृम्भितमिति स्वीकारे तु महान् विप्लव इति पूर्वमेवावोचाम। चेतनं चेतनत्वेन स्वस्वातन्त्र्येण सर्वदा सर्वात्मनाऽऽभासते। न च तच्चेतनं पुंवद् व्यवहरन्त्या ब्रह्मणि वास्तवं नापुसंकं संस्कारं विदधत्याः सर्वं प्रपञ्चं भ्रान्तपदे पातयन्त्याः मायायाः परोक्षमपरोक्षं वा पारतन्त्र्यं भजत इति वादिनः शैवाः प्रपञ्चस्य शिवानतिरिक्तत्वं संविदेकात्मत्वं वा सिद्धान्तयन्तश्चेतनाभासवादिनः सन्ति। एवमस्माभिरालोचिताः काश्चन दर्शनदिशः। तत्राचेतनपरिणामवादः कापिलानाम्, स एव च नामभेदेन 'अचेतनारम्भवादः' नैयायिक-वैशेषिकाणाम्, चेतन-परिणाम-विवर्तवादो वेदान्तिनाम्, चेतनाभासवादश्च महाद्वैतवादिनां काश्मीरशैवानाम्। साख्य-वेदान्त-शैव-शाक्तमतानां कार्यकारणवादेषु समन्वयं प्रतिपिपादयिषुः सौभाग्यभास्करसेतुबन्धादीनां प्रणेता श्रीमान् भास्करराय: शक्तिपरिणामवादं निरुपयति। सांख्यानां प्रकृतिरचेतनापि सती परात्मिका, वेदान्तिनां शक्तिरपि ब्रह्मकोटिप्रविष्टा, क्रमदर्शने शक्तिरेव परं तत्त्वम्, तस्मादेवैतद्दर्शनं देवीनयः कालीनय इत्यप्युच्यते। तन्त्रालोकटीकाकृता[15] जयरथेन क्रमदर्शनं महानयोऽतिनयोश्चोच्यते स्मेत्यापि सूच्यते। अतः काश्मीरदर्शनस्य रहस्यसम्प्रदायेषु तान्त्रिकेषु च शक्तेरेवायं प्रपञ्चस्फारः। शाक्तास्तु शक्तिमेव परतत्वेन निरूपयन्ति। प्रत्यभिज्ञादर्शने शिवस्य षट्त्रिंशत्तत्त्वोत्तीर्णत्वस्वीकारेऽपि शिवशक्त्योस्तादात्म्यं स्वीक्रियते। शिवो यदा विश्वं स्रष्टुमुन्मुखो भवति तदा शक्तिरूपतां प्राप्नोति। विश्ववैचित्र्यावभासनोन्मुखस्य शिवस्यैव शक्तिरिति व्यपदेशः। इत्येवं सांख्ये, वेदान्ते, काश्मीरशैवदर्शने (विशेषतः क्रमदर्शने कुलदर्शने च), शाक्तमते[16]; च सर्वत्रैव शक्तिः स्वीक्रियते। स्त्रीतत्वे च सृष्टिक्रियाया व्याख्यानं सुलभम्। सैव च सर्वत्र "स्त्रीरूपेण संस्थिता" परात्परा जगदुदयस्थितिसंहृति-नियामिकेति शाक्ताः कथयन्ति।

श्रीमान् भास्करराय: सर्वेषां दर्शनानां शक्ते: परिणामवादस्वीकारे समन्वयं सम्भवं मनुते । तदनुसारं च एतत्सिद्धान्तस्वीकरणेन शिवस्याप्यपेक्षा नास्ति । शक्तिरेव परं तत्त्वम् । तदेव धर्मो धर्मी च । तथा चोक्तं तेनैव सप्रमाणं यथा- "देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादि-श्रुतिभि: । शक्तिशक्तिमतोरभेदाच्च न ब्रह्मणो निर्धर्मकत्वभङ्ग: । तदुक्तं श्रीपद्मपादाचार्यै:- "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा: अपृथक्त्वेऽपि पृथगिवावभासन्ते" इति । अत एव तादृशशक्ति-विशिष्टमेव परं ब्रह्मेति तान्त्रिकसिद्धान्त: । तेन शक्तेरपि ब्रह्मकोटावेव प्रवेश: । संक्षेपशारीरकेऽपि—

"चिच्छक्ति: परमेश्वरस्य विमला चैतन्यमेवोच्यते" इति ।

ततश्च शुद्धपटस्येव लाञ्छनाद्यसम्भावात्सान्द्रत्वापादिकाया अन्नरसस्थानीयाया: शक्तेरेव सृष्टिजनकत्वम् । परशिवस्य सान्निध्यमात्रेणैव कारणत्वम् । तत्तु कारणतावच्छेदकताया: पर्याय एव । ततश्च शिवनिष्ठा शक्तिरेव सृष्ट्यात्मना परिणमते" (सेतुबन्धे, पृ० 113) शिवनिष्ठा शक्तिस्तत्सान्निध्येन सृष्टिं निर्मिमीत इति प्रतिपादनेन हि भास्कारराय: सांख्यानामेव पदाङ्कामनुधावति । इयानेव हि तस्य विशेषो यदचेतनप्रकृतिस्थाने स चेतनां शक्तिं प्रतिष्ठापयति । प्रकृतौ पुरूषसान्निध्येन चेतना समुद्भवति, समुद्भवन्ती वा प्रतिभासत इति सांख्यै: प्रतिपाद्यते । अत्र तत्सान्निध्यं शक्तेश्चेतनतयाऽनपेक्षं भवति, अतो भास्करराय: शक्ते: शिवनिष्ठतां सहजसामरस्यसुभगां परिजिहीते । शक्तिमत: शिवस्यैव यदि परत्वं तर्हि किमनेन शक्तिपरिणामप्रतिपादनेन लब्धं स्यादिति वितर्क्यैव भास्कर: परशिवस्य कल्पनमेवा-पार्थकं मनुते सामरस्यसंमिश्रं परमाद्वैतं च वेदान्तिनां मायाद्वैते पातयति । शक्ते: परिणामवाद: केनापि रूपेण सर्वत्रैव दर्शनेषु स्वीकृत: कथं विभिन्ना दर्शनस्थितयो दिग्भेदेन मनाग् भिन्ना:, कथं च तासां समन्वय: सर्वथा सम्भवीति प्रतिपिपादयि-षुर्भास्करराय उल्लिखति—

औपनिषदानां पक्षस्तु परस्य चिद्रूपस्य ब्रह्मण: शक्तिर्मायाख्या । परं ब्रह्म तु विवर्तोपादाताम् । अत एव जगतोऽपि मायिकत्वाज्जडत्वं मिथ्यात्वं च । अद्वैतश्रुतयस्तु पारमार्थिकव्यक्तिरेकैवेत्येवंपरा: । सर्वं ब्रह्मेति सामानाधिकरण्यं तु बाधायामित्यादि: । तान्त्रिकाणां पक्षस्तु—चिन्निष्टा या चिच्छक्तिरौपनिषदानामपि सम्मता, सैवानन्तरूपत्वान्मायेत्युच्यते । "परास्य शक्तिर्विविधैव श्रूयते" । "माया चाविद्या च स्वयमेव भवति" इत्यादिश्रुते: । तत्परिणाम एव प्रपञ्च: । अत एव च चिद्रूप: । चिद्विलास: प्रपञ्चोऽयमिति ज्ञानवासिष्ठात् । अत एव च सत्योऽपि सर्वं ब्रह्मेति सामानाधिकरण्यस्यात्यन्ताभेद एव स्वारस्यात् । न चाद्वैतश्रुतिविरोध: । विरोधापादकस्यैकस्य भेदस्यैव मिथ्यात्वाङ्गीकारादित्यादि: । "प्रकृतिश्च प्रतिज्ञा-दृष्टान्तानुपरोधात्, आत्मकृते: परिणामात् तदनन्यत्वमारम्भणशब्दादिभ्य:" इत्यादिवैयासिकसूत्राणामप्यस्मिन्नेवार्थे स्वरस इति स्पष्टमेव । एवं च पक्षद्वयेऽपि

प्रपञ्चकारणतया शक्तेरावश्यकत्वे परशिव एवान्तर्गडुत्वान्नौपनिषदैः कल्प्यः, नहि घटं प्रति परिणामिमृत्तिकापेक्षया विवर्तरूपं किञ्चित्कारणान्तरमुपलमामहे । अत एवैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय "यथा सौम्य एकेन मृत्पिण्डेन विज्ञातेन" इत्यादि-दृष्टान्तप्रदर्शनं श्रुतिषूपपद्यत इति" (तत्रैव, पृ० 135)

अथ शक्तेः परिणामस्वीकारे सा शक्तिर्धर्मः कुत्राऽवतिष्ठते? धर्मिणमन्तरा शक्तेः किं कुत्र स्थितिरिति प्रश्नः स्वभावतो विजृम्भते । किन्तु शिवे धर्मिणि स्वीकृतेऽपि स धर्मात्मिकां शक्तिमन्तरा किमपि कर्तुं न प्रभवति । इकारः शक्तिः, शक्तिरहितश्च शिवः शव एव ।

परो हि शक्तिरहितः शक्तः कर्तुं न किञ्चन ।
शक्तस्तु परमेशानि शक्त्या युक्तो यदा भवेत् ॥

एवं च क्षित्यादिकस्य कार्यस्य कारणमन्तरेणासम्भवात् कार्यत्वान्यथानुपपत्या कल्प्यमानोऽपि शिवः शक्तिहीनश्चेत् कारणं भवितुं नार्हति, शक्तिरेव हि तस्मिन् कारणतां विजृम्भयति । यतः कारणं तदेव भवितुमर्हति यत्र उपादानागोचरापरोक्ष-चिकीर्षाकृतिमत्त्वम्" भवति, तच्चेच्छाज्ञानक्रियात्रितयशक्तिसंघटितं भवति । शिव-कल्पनायामप्यनया दिशा शक्तिकल्पनायां आवश्यकत्वात् किमनेनान्तर्गडुना शिवेन, शक्तिरेव परं कारणमिति स्वीक्रियताम् । धर्मो धर्मिणमन्तरां नावतिष्ठत इति प्रश्न-स्तु धर्मधर्मिणोरेकत्वकल्पनया सुपरिहरः । तथाहि भास्कररायः-

"शक्तिकारणतावादिनामस्माकं परशिवस्याकल्पने कार्यत्वानुपपत्तेरपरिक्षयोऽस्ति । धर्मत्वानुपपत्तिस्त्वेकस्यैव वस्तुतो धर्मधर्म्युभयात्मकत्वकल्पनयाऽपि सुपरिहरा ।" (तत्रैव, पृ० 136)

वस्तुतः शिवस्य शक्तेर्वा परिणामस्वीकारे कश्चिद्भेदो नास्ति । शैवदर्शने शिवशक्त्योरद्वयस्यायमेवाभिप्रायो यद्यथा शिवः शक्तिमन्तरा न किञ्चिदपि कर्तुं प्रभवति, तथैव शक्तिरपि शिवमन्तरा नावतिष्ठते । वह्निदाहकयोरिव, चन्द्रचन्द्रिक-योरिव, वागर्थयोरिव वा उभयोरपि नित्यं सामरस्यं परा संपृक्तिर्वा सर्वथैव विजृम्भते। केवलं "स्त्रीलिङ्गस्य पुल्लिङ्गविशेषरूपत्वम्" इति वैयाकरणानां मतमनुसरद्भिः शिवः परतत्वं प्रतिपाद्यते । शिवः कदापि शक्तिविमुक्तो न भवति । शिवस्यैव च किञ्चिदुच्छूनतावस्था शक्तिरिति व्यपदिश्यते । अतः शिवशक्त्योर्भेदमाश्रित्य शिवपरिहारोऽशिवायैव सम्पत्स्यते, सिद्धान्तश्च भज्यते । इत्येवं शक्त्यभिन्नः शिव एव परं कारणं भवतु । किं वा शक्तिमतां पराहतं भवति, शिवस्यैवावस्थान्तरा शक्तिर्जगन्निर्मात्री कल्प्यतां परं न तेन शिवतत्त्वं प्रत्यवस्थेयम् । चेतनं कारणं चिद्रूपत्वाच्चेतनश्चायं प्रपञ्च इत्युभयत्रापि शैवे शाक्ते च दर्शने समानम् । औपनिषदपक्षेऽपि ब्रह्मणश्चेतनत्वाज्जगतश्च तत्परिणामत्वेनात्र सिद्धान्तितत्वात् तत्रापि प्रपञ्चश्चेतनः सेत्स्यति । मायापरिणामवाददुराग्रहे तु सति प्रपञ्चस्याचेतनत्वं परमार्थस्य च चेतनत्वमिति चेतनाचेतनात्मको विरोधो दुष्परिहर एव भविष्यति ।

शैव-शाक्तदर्शनयोरेतां समन्वयसरणिमनाश्रिताः शक्तिदृढाग्रहग्रहिला अस्माभिः पृच्छ्यन्ते, शक्तेः परिणाम कीदृशो भवति? किं पूर्वधर्मनिवृतौ धर्मान्तरोत्पत्तिरूपः? शक्तिवादिनां च मते शक्तिरेव धर्मः, सैव च धर्मिणी, तर्हि किं सृष्टिकाले शक्तिनिवृतौ शक्त्यन्तरोदयः स्वीक्रियते? नो चेत् कोऽयं परिणामः? सतो द्रव्यस्य पूर्वगुणनिवृत्तौ गुणान्तरोत्पत्तिः" अपि परिणाम इत्यभिधीयते, किन्तु शक्तिपरिणाम-वादिनां मतेन पूर्ववदेव शक्तेर्धर्मधर्मिरूपत्वाद् धर्मनिवृत्त्या सह धर्मिणोऽपि विनाश आपतेत् । तेन मूलस्यैव विनाशः । शक्तावेकांशे धर्मत्वमपरांशे च धर्मित्वमिति खण्डबुद्धिस्तु विनाशायैव सेत्स्यति । नानाकारप्रतिभासो हि परिणाम इति तल्लक्षण-स्वीकारे मायावाद आपतति, जगतश्चैतन्यं सत्यत्वं च सावष्टम्भं प्रतिपादितचरं नश्यतः । तदेवं धर्मलक्षणावस्थाभेदरूपस्त्रिविधोऽपि परिणामः शिववर्जितशक्ति-परिणामवादे न घटते । परिणामे च पुनर्यत्किञ्चिद्रूपोऽन्यथाभावो भवत्येव । सति चान्यथाभावेऽनिच्छतोऽपि वैषम्यं प्रकाममापतति । सति च वैषम्ये चैतन्यसत्यत्व-स्वरूपभेदः प्रसज्यते, स च न तान्त्रिकाणामभिमतः । चिद्विलासोऽयं प्रपञ्चश्चितेः स्फारः प्रकाशः आभास एवेति वा स्वीकारे न कश्चिदप्यन्यथाभावरूपो विकारः सिद्धान्तं कलुषीकर्तुं क्षमत इति त्रिकदर्शनविदां शिवाभासवाद एव सुदर्शनानां दर्शनधियं प्रकाशयतुतमाम् । तत्रैव चास्माकं हृदयम्, तत्रैव च सर्वासां दर्शनविपदां समाधानम् । अन्यथावादे हि परतत्त्वेन सह सन्ततमैक्यमावहन् सम्बन्धो दुरुपपादो भवति, न हि दधिरूपेण स्वलक्षणविकारेण परिणतं दुग्धं कोऽपि दधिभावेन परिचिनुयात् । चेतनशक्तेः परिणामः, अचेतनप्रकृतेर्वा विकारः, अचेतनानामारम्भश्चेतनस्य वा ब्रह्मणः कारणविलक्षणो मिथ्या प्रत्ययरूपः प्रतिभास इत्यादिवादस्वीकारे सहजसुभगः परतत्त्वात्मा सम्बन्धो विघटते, कारणस्य कार्येण सह वैरूप्यापत्तिश्च भवति । सर्वोऽयं प्रपञ्चो यथावस्थित एव शिवप्रकाशस्तत्स्वातन्त्र्येण परिस्फुरतीति सिद्धान्तिते तु शिवोऽयं शिवोऽहमिति प्रत्यभिज्ञानं सुकरं सूपपादञ्च भवति, परत्वेन सह द्वैतापादिकां भ्रान्तिं व्यवहारकालेऽपि निरस्य परमाद्वैतं सार्वत्रिकं प्रतिष्ठापयति । शिवस्य जीवजगतोश्च वस्तुतो कश्चिदपि भेदो नास्तीति नः सिद्धान्तः । यथा शिवो विश्वमयः सर्वाकृतिश्च तथैव "चितिसङ्कोचात्मा चेतनोऽपि सङ्कुचितविश्वमयः"[17] यथा शिवः षट्त्रिंशत्त्वात्मनाऽऽत्मानं विभज्य विश्वं व्याप्य स्थितस्तथैव प्रमाताऽपि संकुचितचिद्रूपः सङ्कुचिताशेषविश्वात्मना भाति । यथाहुः प्रत्यभिज्ञाकाराः—यथा च एवं भगवान् विश्वशरीरस्तथा चितिसङ्कोचात्मा सङ्कुचितचिद्रूपश्चेतनो ग्राहकोऽपि वटधानिकावत् सङ्कुचितावशेष विश्वरूपः, तथा च सिद्धान्तवचनम्—"विग्रहो विग्रही चैव सर्वविग्रह-विग्रही" । अतः शिव इव जीवोऽपि विश्वात्मको विश्ववपुश्च विद्यते । यथा समष्टिस्तथा व्यष्टिः । समष्टिव्यष्ट्योरात्मपरमात्मनोः, परतत्त्वतत्प्रकाशयोस्त्रि-विधमलोद्भूतचितिसङ्कोचमन्तरा कश्चिदन्यो भेदो नास्ति । ग्राहकोप्ययं प्रकाशै-कात्म्येन उक्तागमयुक्त्या च विश्वशरीरशिवैकरूप एव केवलं तन्मायाशक्त्याऽनभि-

व्यक्तस्वरूपत्वात् सङ्कुचित इवाभाति । सङ्कोचोऽपि विचार्यमाणाश्चिदैकात्म्येन प्रथमानत्वाच्चिन्मय एव, अन्यथा तु न किञ्चिदिति सर्वो ग्राहको विश्वशरीरः-शिवभट्टारकः। (**प्रत्यभिज्ञाहृदये**)

शिवः कारणं जीवश्च तदाभासत्वात् कार्यं तयोश्चाभेदाभ्युपगमात् कार्यकारण-वाद एव व्याहतो भवतीति न वाच्यम्, वस्तुतः कार्यकारणभेदविचार एव दर्शनप्रवृत्तेर्मूलम्, ऐकान्तिकात्यन्तिकाभेदसिद्धान्त एव सर्वेषां सद्दर्शनानां स्वारस्यात्। शैवशासननये च कार्यकारणयोरभेदसिद्धान्तेन तयोः सहावस्थानेन च व्यावहारिकं पारमार्थिकं चाद्वैतमेव साध्यते, तदेव च सिषाधियिषितम् । कार्यकारणवादश्च विश्वोत्तीर्णस्यैव विश्वमयत्वं व्याख्यातुं प्रवर्तते, न तदन्यथाकर्तुम् । चितेः स्वातन्त्र्य-विजृम्भितश्चायं कार्यकारणभाव इति स्वातन्त्र्यशक्तेः पारमार्थिकत्वेन कार्यकारण-भावोऽपि पारमार्थिकश्चेतनः सद्रूपश्च ।

ननु जगदपि चितो भिन्नं नैव किञ्चित् । अभेदे च कथं हेतुहेतुमद्भावः? उच्यते–चिदेव भगवती स्वच्छस्वतन्त्ररूपा तत्तदनन्तजगदात्मना स्फुरतीत्येतावत् परमार्थोऽयं कार्यकारणभावः। **प्रत्याभज्ञाहृदये पृ. 22**

अतः परमस्वतन्त्रस्य शिवभट्टारकस्य स्वातन्त्र्यविजृम्भितोऽयमाभासः प्रपञ्च इत्यभिधीयते, स एव संविद्विलासः चिद्विलासः चिदाभासः चित्सत्ता चित्स्फुरणमिति नामान्तरैर्व्यपदिश्यते । स चायमाभास उपादानसहकारिकारणादिपारतन्त्र्यं निरस्य शिवस्य स्वेच्छया स्वभित्तौ स्फुरति । शिव एव च तत्तन्नामभेदेन शक्त्यादिकम-पृथग्भूतमुपादानं परिकल्प्य षट्त्रिंशत्तत्वात्मना चकास्ति । स एव परं कारणम्, स एव च जगदात्मना कार्यमप्युच्यताम्, तदतिरिक्तो न कश्चन कार्यकारणभावोऽपी-त्येकस्यैव चेतनस्य चेतनरूपं कार्यमिति प्रतिपादनेन पारमार्थिकं परमाद्वैतं व्यवहारेऽपि प्रतिष्ठितम् ।

शिवाभासवादिनश्च शिवस्वातन्त्र्यमेव जगत उपादानादिकारणसम्भारं मन्यन्ते । स्वातन्त्र्ये कर्तृत्वं प्रतिष्ठितम्, कर्तृत्वमेव च कारणत्वम् । यथा हि "योगिनामिच्छा-मात्रेण पुरसेनादिवैचित्र्यनिर्माणम्," दृश्यते, तत्रोपादानं प्रसिद्धमृत्काष्ठशुक्रशोणितादि-वैचित्र्यमयं न सम्भवति । पुनश्च 'योगी कुम्भं निर्मिमाणः कुम्भकारः प्रसिद्धसमस्त-सामग्रीसमर्जनपुरस्सरं घटं घटयन् कुम्भकार एव स्यात्' इत्युपादानकारणान्तर-चिन्तया स्वातन्त्र्यं व्याहतं भवेत् । अतो योगिसंविदस्तादृशी शक्तिः स्वीकार्या, यया प्रसिद्धोपादानादिकारणचिन्तां विनैव योगिनिर्माणं भवति । योगीव च शिवो वर्तमानावभासानां भावानामवभासनमन्तःस्थितवतामेव बाह्यरूपतया घटयति ।[18]
अत एवाहुरुत्पलाचार्याः–

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥

(**–ईश्वरप्रत्यभिज्ञाकारिका** 1.5.7)

शिवस्य कवेरिव योगिन इव निरुपादनक एव जगत्सर्गस्तत्तदात्मनाऽवभासमानश्च शिवस्वरूपादनतिरिक्तः । तथा चाहुः–

निरुपादानसम्भारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघाय शूलिने ॥ (–स्तवचिन्तामणौ 9)

देशकाल-क्रिया मूर्त्तिवैचित्र्यकृता अपि भेदाः शिवेनैवाभास्यन्ते । न पुनः काल-स्वभाव-नियति-यदृच्छारूपाणि' शिवमतिरिच्य वर्तमानानि कानिचिदन्यानि तत्त्वान्तराणि सन्तीत्यपि स्पष्टमेव । कार्यकारणभावश्च कालादिकृतो भवति, तेषाञ्च शिवरूपत्वात् स शिव एव कारणं, कार्यं तद्भावघटकश्च । तत एवाहुरभियुक्ताः–

मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ ।
क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः ॥
सर्वत्राभासभेदोऽपि भवेत् कालक्रमाकरः ।
विच्छिन्नभासः शून्यादेर्मातुर्भातस्य न सकृत् ॥
देशक्रमोऽपि भावेषु भाति मातुर्मितात्मनः ।
स्वात्मेव स्वात्मना पूर्णा भावा भान्त्यमितस्य तु ॥

(–ईश्वरप्रत्यभिज्ञाकारिका 2. 1. 5-7)

सर्वे भावाश्च शिवात्मकाः, अतस्ते चेतनाः, सद्रूपाः नित्याश्च । शिवस्य प्रपञ्चस्य च महार्थविमर्शेन कश्चिदपि भेदो नास्ति । यदिदं यद्रूपेण यत्र येन यदोपलभ्यते, तत्सर्वं तद्रूपेण शिवस्वरूपम्, शिवस्वातन्त्र्यविजृम्भितमिति । एकस्यैवानन्तरूपोऽयं चेतनः सत्यश्च विलासस्तस्मान्न भिद्यते–

यस्मादेतत् समुत्पन्नं महादेवाच्चराचरम् ।
तस्मादेतन्न भिद्येत यथा कुम्भादिकं मृदः ।
शिवतत्त्वात् समुत्पन्नं जगदस्मान्न भिद्यते ।
फेनोर्मिबुद्बुदाकारो यथा सिन्धोर्न भिद्यते ॥
यथा पुष्पपलाशादि वृक्षरूपान्न भिद्यते ।
तथा शिवात् पराकाशाज्जगतो नास्ति भिन्नता ॥

(–सिद्धान्तशिखामणौ परि 10)

रज्जौ सर्प इव, छायायां पिशाच इव द्विचन्द्रवद्वा नास्त्ययं प्रपञ्चः । नास्य दोषवशात्प्रतीतिः । जगदिदं देवस्य काव्यं (पश्य देवस्य काव्यं न ममार न जीर्यति) लीलावपुषो लीला कैवल्यं (ब्रह्मसूत्रं 2.1.33), नटराजस्य नर्तनं (नर्तक आत्मा– शिवसूत्रं 3.9.1.13), योगिनो विभूतिः (योगीव निरुपादानमर्थजातं प्रकाशयेत्), चित्रकारस्य चित्रं, महासागरस्योर्मि, चिन्तकस्य चिन्तनोन्मेषः, पुष्पस्य गन्ध एवास्ति । किं बहुना स शिव एव स्वयं

सभ्यो नरो विभावादिभावाः रङ्गः स्वयं भवन् ।
स्वचरित्रानुकारेण स्वमेव भजते रसम् ॥(विंशतिशास्त्रं, 13)

1. संविदात्मनि विश्वोऽयं भाववर्गः प्रपञ्चवान् ।
प्रतिबिम्बतया भाति यस्य विश्वेश्वरो हि सः ॥ :तन्त्रालोके 3.268,
2. इहाद्वयनये हि भगवानेव स्वस्वातन्त्र्यमाहात्म्याद् आभासमात्रसारतया स्वाव्यतिरिक्तमपि व्यतिरिक्तत्वेनेव जगदाभासयति-इत्यनन्यापेक्षिणः स्वातन्त्र्यस्यैव जगद्वैचित्र्यनिमित्तत्व-मुक्तम्, अविद्यावासनादीनां भेदाभेदविकल्पोपहतत्वाज्जगद्वैचित्र्यनिमित्तत्वाभिधानोपपत्तेः ।
--तन्त्रालोकविवेके आह्निके 1 पृ0 6
3. सांख्यकारिकायाम् 57
4. तत्रैव 56
5. तत्रैव 61
6. द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव । -तर्कसङ्ग्रहे पृ01
7. ज्ञानाधिकरणमात्मा । (तत्रैव)
8. तैत्तिरीयोपनिषदि 2.1
9. छान्दोग्योपनिषदि 6.2.1
10. "संविदेवाभ्युपगतस्वातन्त्र्यलक्षणादिच्छाविशेषादन्तःस्थितमेव भावजातमिदमित्येवं बाह्यत्वेनाभासयति."–ईश्वरप्रत्यभिज्ञाविमर्शिन्याम् 1.182.5
11. "संविदः स्वरूपं सर्वत्र वर्तते पाषाणादयोऽपि चेतनास्तत एव ते वृद्धिमुपयान्ति। तथा हि भास्करः-"पाषाणादिष्वपि तस्याः स्थितिरनिवार्यैव, शुक्तिशुक्रचैतन्ययुक्तत्वात् । अन्यथा वृद्ध्याद्यसम्भवात् । अत्र तरूणां चैतन्ये स्वकीयं केशादि, पाषाणादीनां चैतन्ये स्वकीयमस्थिजातं साक्षितया स्थितम् ।"
–भास्कर्यां भागे 1 पृ0 28
12. प्रकाशात्मा प्रकाशोऽर्थो नाप्रकाशश्च सिद्ध्यति ।
13. देहसुखनीलादि यत् किञ्चित् प्रथते, अध्यवसीयते, स्मर्यते, सङ्कल्प्यते वा तत्र सर्वत्रैव भगवती चितिशक्तिमयी प्रथा भित्तिभूतैव स्फुरति । तदस्फुरणे कस्याप्यस्फुरणात् ।
–प्रत्यभिज्ञाहृदये पृ0 94

अन्यच्च—
मायाशक्त्या विभोः सैव भिन्नसंवेद्यगोचरा ।
कथिता ज्ञानसङ्कल्पाध्यवसायादिनामभिः ॥
14. "अहमेव प्रकाशात्मा प्रकाशे, इति हि विमर्शोदये स्वसंविदेव प्रमातृ-प्रमेयप्रमाणादिकृतार्थ-मभिमन्यते, न त्वतिरिक्तं काङ्क्षति ।"
–भास्कर्य्याम् भागे 1 पृ0 243
15. तन्त्रालोकविवेके तृतीये भागे पृ0 195,
16. शक्तिः करोति ब्रह्माण्डं सा वै पालयतेऽखिलम् ।
इच्छया संहरत्येषा जगदेतच्चराचरम् ॥
--देवीभागवते,
17. प्रत्यभिज्ञासूत्रम्, 4
18. वर्तमानावभासानां भावानामवभासनम् ।
अन्तःस्थितवतामेव घटते बहिरात्मना ॥
–ईश्वरप्रत्यभिज्ञाकारिकायाम् 1.5.1

अद्वयम्

इतः पूर्वं प्रकरणान्तरेषु वारम्वारं सूत्रितोऽपि शिवाद्वयवादो दर्शनान्तरप्रयुक्ताद्वैताद्वयशब्दार्थपरामर्शपुरस्सरं सविशेषमुल्लेखमर्हति । योगाचाराणां विज्ञानाद्वैतं, शून्यमेव सर्वमभ्युपगच्छतां माध्यमिकानां शून्याद्वयं, शब्दविवर्तं शब्दपरिणामं वाऽभ्युपगच्छतां वैयाकरणदार्शनिकानां भर्तृहरिप्रभृतीनां शब्दाद्वैतं निर्विशेषब्रह्माद्वैतं शांकरवेदान्तिनां, विशिष्टाद्वैतं रामानुजीयानां, शुद्धाद्वैतं च वल्लभाचार्यानुगामिनां, विश्रुतमेव । भूताद्वैतवादो लोकायतिकानामित्यपि केचन प्रतिपन्नाः । तत्र पूर्वमद्वैताद्वयशब्दयोः प्रवृत्तिं पर्यालोचयामः ।

बौद्धाः वेदान्तिनस्त्रिकदार्शनिकाश्च प्रायेण अद्वैतमद्वयं च पर्यायत्वेन प्रयुञ्जते स्म । तथा हि गौडपादाचार्याः "अद्वयेन च कल्पितः, भावा अप्यद्वयेनैव तस्माद‌द्वयता शिवा (2-33), प्रपञ्चोपशमोऽद्वयः (3-35), अद्वयं च द्वयाभासं (3-30), विवदन्तोऽद्वयाः (4-4), विज्ञानं शान्तमद्वयम् (4-45), यानुत्पत्तिः समाद्वया (4-77), तत्साम्यमजमद्वयम् (4-80)" इति बहुधाऽद्वयशब्दं प्रयुज्य अन्यत्र स्वकारिकास्वेव "अद्वैतः सर्वभावानां (1-10), अद्वैतः परमार्थतः (1-17), रज्जुनेवेति चाद्वैतम् (2-18), अद्वैते योजयेत् स्मृतिम्, अद्वैतं समनुप्राप्य (2-36), अद्वैतं परमार्थो हि (3-18)" इत्यत्राद्वैतशब्दं प्रयुञ्जते । नृसिंहोत्तरतापिन्याद्युपनिषत्सु[1] तथैव पदद्वयस्य पर्यायत्वेन प्रयोगः प्राप्यते । अमरसिंहेन स्वकोशे स्वर्गवर्गे बुद्धोऽद्वयवादीति घुष्यते-षडभिज्ञो दशबलोऽद्वयवादी विनायकः । अमरसिंहः 'अद्वयमद्वैतं वदन्त्यवश्य' मिति । क्षीरस्वामी च 'अद्वयं विज्ञानाद्वैतं वदन्तमवश्यमिति भाष्यं करोति । श्रीचन्द्रकीर्तिः माध्यमिकवृत्तौ प्रसन्नपदायामुपक्रमे स्पष्टमुद्घोषयति"-**तस्मादद्वयवादिनां माध्यमिकानां कुतो मिथ्यादर्शनम्? नो वयं नास्तिकाः । अस्तित्वनास्तित्वद्वयनिरासेन तु वयं निर्वाणपुरोगामिनमद्वैतपदं विद्योतयामः"** । श्रीशङ्कराचार्योऽपि तथैव माण्डूक्यकारिकाभाष्येऽद्वयपदमद्वैततात्पर्यतया प्रयुङ्क्ते—"**ज्ञानज्ञेयज्ञातृभेदरहितं परमार्थतत्त्वमद्वयमेतन्न बुद्धेन भाषितम् । यद्यपि बाह्यार्थनिराकरणं ज्ञानमात्रकल्पना च अद्वयवस्तुसामीप्यमुक्तम् । इदन्तु पारमार्थिकमद्वैतं वेदान्तेष्वेव ज्ञेयम्**" ।

तथा चान्यत्र छान्दोग्योपनिषद्भाष्यम् "परमार्थसत् अद्वयं ब्रह्म (6.2.1.)" तैत्तिरीयोपनिषद्भाष्यं (2-1) अद्वयपदस्याद्वैतपर्यायतां स्वीकुर्वाते । संहितासूपनिषत्सु चैतत्पदद्वयं न श्रूयते ।[2] तत्र प्राधान्येन एकत्वस्याम्नायः सुप्रतिष्ठः । तथाहि-'एकं सद्विप्राः बहुधा वदन्ति' (ऋक्, 1. 164. 46) अथवा-

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीमुतद्यामुतेमां कस्मै देवाय हविषा विधेम ।[3]

(ऋक्. 10. 121.1)।

ऋग्वेदान्तर्गतेन पुरुषसूक्तेन 'पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्' (ऋक् 10. 9. 2) इत्येनन द्यौरन्तरिक्षादीनामदितिरूपत्वं श्रुत्या[4] चान्यत्र एकस्यैव प्राधान्यं प्रतिपिपादयिषितम् । अमुमेवार्थं आथर्वणं स्कन्दसूक्तं (10. 7-8) उच्छिष्टसूक्तं (11.9) च दृढयतः ।

उपनिषत्सु यथाऽयमर्थो बहुधा संवादितः सिद्धान्तितश्च तत्र भगवच्छङ्कराचार्योद्धृतानि वेदान्तवाक्यानि प्रमाणकोटिमाटीकन्ते । तथाहि चतुःसूत्रीस्थचतुर्थसूत्रभाष्योद्धरणानि-

1. सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम् (छान्दोग्य 6.2.1)
2. आत्मा वा इदमेक एवाग्र आसीत् । (ऐतरेय 2.1.1.)
3 ब्रह्मैवेदममृतं पुरस्तात् (मुण्डक 2. 2. 11)
4. ऐतदात्म्यमिदं सर्वम् ।

तदेवैकं तत्त्वमद्वितीयपदेन छान्दोग्योपनिषदि (6-2-1) विवृतम् । बृहदारण्यकोपनिषदि (2.4.14) 'यत्र हि द्वैतमिव भवति' इत्यत्र द्वैतपदप्रयोगे कृतेऽपि अद्वैतपदप्रयोगो व्यावृत्त्या विवृतेऽप्यर्थे न प्राप्यते । तथा हि तत्र बृहदारण्यकोपनिषत् (2-4-14) 'यत्र वा अस्य सर्वमात्मैवाभूतत्केन कं जिघ्रेदि' त्यादि श्रूयते, अद्वैतपदप्रयोगस्तु न प्राप्यते । तथैवाद्वयपदप्रयोगविषयेऽपि ज्ञेयम् ।

अद्वैताद्वयशब्दयोरनेकधा प्रयोगो गौडपादकृतमाण्डूक्यकारिकासूपलभ्यते ।

अद्वयं च द्वयाभासं मनः स्वप्नो न संशयः ।
अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः । (3.3)

अत्र श्रीशंकराचार्यपादानां भाष्यम्—"रज्जुरूपेण सर्प इव परमार्थत आत्मरूपेण अद्वयं सत् । द्वयाभासं मनः स्वप्ने न संशयः । न हि स्वप्ने हस्त्यादिग्राह्यं तद्ग्राहकं वा चक्षुरादिद्वयं विज्ञानव्यतिरेकेणास्ति । जाग्रदपि तथैव इत्यर्थः परमार्थसद्विज्ञानमात्राविशेषात् । अर्थात् ग्राह्यग्राहकरूपेण संविभक्तं द्वयाभासं मायया मनोदृश्यतया वा स्पन्दन्ते[5] आत्मसत्यानुबोधेनामनस्तादशायां द्वैताभावेऽद्वैतं पर्यवस्यति । धर्मकीर्तेः प्रमाणवार्तिकवचम्—

नीलादिरूपस्तस्यासौ स्वभावोऽनुभवश्च सः ।
नीलाद्यनुभवात्ख्यातः स्वरूपानुभवोऽपि सत् ॥

(प्रमाणवार्तिके 3,328)

दिङ्नागानां च—

यदन्तर्ज्ञेयरूपं तत् बहिर्वदवभासते ।
सोऽर्थो विज्ञानरूपत्वात् प्रत्ययत्वात् तथापि च (आलम्बनपरीक्षा।, 7)

इति वाक्यमनुसन्धाय श्रीविधुशेखरभट्टाचार्यादयो माण्डूक्यकारिकाप्रतिपादनं बौद्धमतानुकूलं मन्यन्ते, तदनुसन्धाय चाद्वयाद्वैतपदव्याख्यानं चिकीर्षन्ते। सर्वज्ञात्ममुनिर्निर्विशेषब्रह्मवादिनां वेदान्तिनामद्वैतं बौद्धसम्मतमेवेति पूर्वपक्षं संक्षेपशारीरके (2.25.27) साटोपमुट्टंकयति।

(क) ननु शाक्यभिक्षुसमयेन समः प्रतिभात्ययं च भवत्समयः।
यदि बाह्यवस्तु वितथं नु कथं समयामिमौ न सदृशौ भवतः॥
(ख) यदि बोध एव परमार्थवपुर्ननु बोध्यमित्यभिमतं भवति।
ननु चाश्रितं भवति बुद्धमतमेव कृत्स्नमिह मस्करिभिः।
(ग) उपयन्भदन्तमुनिना सदृशः कथमेष वैदिकमुनिर्भवति।

अत्र वेदान्तमतं सिद्धान्तयति सर्वज्ञात्ममुनिः

परमार्थसंश्रयतमोजनितं प्रविभक्तमेव तु परस्परतः।
स्थिरमभ्युपेतमिह समये न तु मातृमानविषय प्रभृति

(संक्षेपशारीरके 2.28)

सोऽयमर्थः खण्डनखण्डखाद्ये श्रीहर्षेण प्रथमे परिच्छेदे स्पष्टतरं निरूपितः यत् बौद्धाः सर्वमेव मिथ्या अनिर्वचनीयं वेति कथयन्ति। किन्तु अद्वैतवेदान्तिनः सर्वमिदं जगत् सत्त्वासत्त्वाभ्यामनिर्वचनीयमिति कथयन्ति। सत्त्वन्तु एकमेव। जगत् तु न सत्त्वेन न वा असत्त्वेन प्रतीयते। सौगतब्रह्मवादिनोः विशेषः क इति चेदयं विशेषः-यदस्माकं मते सर्वमनिर्वचनीयं भवति। ....विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सत्त्वासत्त्वाभ्यामनिर्वचनीयं ब्रह्मवादिनः संगिरन्ते।[6] अयमत्र निष्कृष्टार्थः—अद्वयाद्वैतशब्दयोः बौद्धेषु वेदान्तिषु च पर्यायतया प्रयोग उपलभ्यते किन्तु तयोरभिप्रायस्तु भिद्यते। बौद्धानां मते अद्वयेन अद्वैतेन वा द्वयं द्वैतवत् निषिध्यते। वेदान्तिभिस्तु निषेधेन सह सत्त्वमेकत्वं परमार्थं सदिति व्यवस्थाप्यते। तत्राद्वितीयपरं, एकं सदितिपरं वाद्वयमद्वैतं वा। कूटस्थनित्यं सदिति बौद्धा न स्वीकुर्वन्ति। असन्मूलं निषेधपरं च बौद्धानामद्वयम्।[7] सर्वस्य शून्यतां विज्ञप्तिमात्रतां वा क्षणिकां ते साधयन्ति। प्रायेण वेदान्तशास्त्रमद्वैतपदमद्वयपदापेक्षया बहु मन्यते प्रयुङ्क्ते च।

अद्वैतपदव्युत्पत्तिस्तु तैरियं प्रदर्श्यते-

द्विधा इतं द्वीतम्। तस्य भावो द्वैतम्। द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते। (बृ. वा. 4.3.1807)। न विद्यते द्वैतं द्विधाभावो यत्र तत् (सिद्धान्तबिन्दुः 10)।

'तदन्यत्वमारभमाणशब्दादिभ्य' इति सूत्रस्थं शाङ्करभाष्यं "द्विधा भेदमितः प्राप्तः। न द्वैतो द्वितीयरहितः" अद्वैतपदमद्वितीयार्थतया प्रख्यापयति। अद्वयपदं नास्ति द्वयं द्वित्वं तज्ज्ञानमित्यर्थे व्युत्पाद्यते। अवयवभेदं प्रकारभेदं वा निराकरोत्यद्वयशब्द इति केचन मन्यन्ते।[8]

त्रिकशास्त्रेष्वपि अद्वयाद्वैतशब्दौ पर्यायरूपेण बहुशः प्रयुज्येते। तथा हि-

इदं हि तत् पराद्वैतं भेदत्यागग्रहौ न यत्। (मालिनीविजयवार्तिकम् 1.123)

इदं द्वैतमिदं नेति तदिदं च द्वयाद्वयम् ।
इति यत्र समं भाति तदद्वयमुदाहृतम् ॥ (तत्रैव 1-629)
अत एव पराद्वैतं यद्विश्वानुग्रहात्मकम् ।
तस्योपायं परं ब्रूते हृदयं स्पन्दनात्मकम् ॥ (तत्रैव 1.18)
या तत्र (जगदानन्दे) सम्यग् विश्रान्तिस्तत् पराद्वैतमुच्यते ।
(तत्रैव 2-42)

भक्तानां भवदद्वैतसिद्धये का नोपपत्तयः ।
तदसिद्धयै निकृष्टानां कानि नावरणानि वा ॥
(शिवस्तोत्रावली 1.15)

उच्यते नाद्वयेऽमुष्मिन् द्वैतं नास्त्येव तत्त्वतः ।
उक्तं हि भेदवन्ध्येऽपि विधौ भेदावभासनम् ॥
(मालिनीविजयवार्तिके, 1.108)

अत एव हि भेदोऽस्ति न कश्चिद्यो महेश्वरम् ।
अद्वयं सम्प्रभिन्दीत प्रकाशानन्दसुन्दरम् ॥ (तत्रैव 1.621)
शक्तिश्च नाम भावस्य स्वरूपं मातृकल्पितम् ।
तेनाद्वयः स एवापि शक्तिमत्परिकल्पने ॥ (तन्त्रालोके 1.69)
अद्वैतमेव न द्वैतमित्याज्ञा परमेशितुः[9] **।** (तत्रैव 29.74)

एतैर्वचनैरद्वयाद्वैतशब्दयोस्त्रिकदर्शने पर्यायतया प्रयोगो बौद्धवेदान्ताङ्गीकृताभिप्रायाद्भिन्नार्थक इत्यपि सिध्यति । वस्तुतः परतत्त्वविषये दृष्टिभेदादेव तत्तद्दर्शनेषु एतौ शब्दावर्थतो भिद्येते । वस्तुतो द्वैताद्वैतादिशब्दाः शिवाद्वये घटकुम्भवदेकार्थाः सन्ति । शब्दा भिद्यन्ते अर्थस्तु अपराहत एवाद्वयं साधयति ।

अस्यां भूमौ सुखं दुःखं बन्धो मोक्षश्चितिर्जडः ।
घटकुम्भवदेकार्थाः शब्दास्तेऽप्येकमेव च ॥ (तन्त्रालोके 2.19)

तथैव बोधपञ्चदशिकायाम् (14)-

एतौ बन्धविमोक्षौ च परमेश्वरस्वरूपतः ।
न भिद्येते न मेरौ हि तत्त्वतः परमेश्वरे ॥

बौद्धाः सांवृतत्वेन वेदान्तिनश्चाविद्यया भेदमापादयन्ति । चिद्रूपस्य वास्तविकैकत्वे सर्वमेतत् न संगच्छते । सत्यासत्यविभागो हेयोपादेयविभागः, शुद्ध्यशुद्धिविभागोऽद्वैतस्वीकारेऽवास्तविक एव । तद्भेदस्वीकारे वस्तुतः आत्मवञ्चना, द्वैतपङ्कपात एव वा स्यात् । विधि-निषेध-भक्ष्याभक्ष्य-शुद्ध्यशुद्धिरूपविभागमपि त्रिकदार्शनिका द्वैतबुद्धिजनकत्वान्न सहन्ते प्रतिवदन्ति च यदि प्रमात्रा शुद्ध्यशुद्धिविभागो वस्तुधर्मतयेष्यते तर्हि न हि तदन्यथा कर्तुं शक्यते ।[10] पृथिव्याः जलेन जलस्य पृथिव्या च शोधनेऽन्योन्याश्रयदोषः प्रसज्यते । अशुद्धेन अन्यदशुद्धं यदि शोध्यते तर्हि द्वयोरपि समानरूपत्वाद्वैयर्थ्यापत्तिः । यदि एकतरापरेण द्रव्येण

शुद्धिरापाद्यते तर्हि अनवस्था स्यात् । अतो न किञ्चिदपि शुद्धमशुद्धं वा । सर्वेषां शिवात्मकत्वान्न कुत्रापि वास्तविकमशुद्धत्वमापादनीयम् । वस्तुतः परिमितप्रमातैव स्वसंस्कारानुरूपं विधिनिषेधादिव्यवस्थां विकल्पबुद्ध्या दिक्कालानुरूपमुद्भावयति न तत्र पार्यन्तिकं द्वैतमास्थेयम् । संविदद्वयप्रतिष्ठापकस्य शुद्धत्वं द्वैतबुद्धिजनकस्य चाशुद्धत्वमित्येव केवलमास्थातुं शक्यते ।[11] भेदाभेदविरोधोऽप्यन्यैरद्वयवादिभिर्व्याख्यातुं न सुशकः । तथाहि त्रिकदर्शनविदः–"**अत एव भेदाभेदयोर्विरोधं दुःसमर्थमभिमन्यमानैरेकैरविद्यात्वेनानिर्वाच्यत्वमपरैश्चाभासलग्नतया सांवृतत्वमभिदधद्भिरात्मा परश्च वञ्चितः**" ।

(ईश्वरप्रत्यभिज्ञाविमर्शिनी 2-3-14)

अन्यच्च तत्रैव (2.4.20)

चिद्रूपस्यैकत्वं यदि वास्तवं भेदः पुनरयमविद्योपप्लवादित्युच्यते तदा कस्यायमविद्योपप्लव इति न संगच्छते । ब्रह्मणो हि विद्यैकरूपस्य कथमविद्यारूपता । न चान्यः कश्चिदस्ति वस्तुतो जीवादिर्यस्याविद्या भवेत् ।"

अत एवाहुर्महार्थमञ्जरीपरिमलटीकाकाराः–"**तत्र हि अद्वैतमाग्रहेणोपपाद्यमानमपि द्वैतकक्ष्यामेवाधिरोहति यदत्र सत्यासत्यव्यवस्थया हेयोपादेयकल्पनायां तेनैवाकारेण द्वैतमर्यादायां पर्यवसायित्वमनिवार्यम् ।**

(परिमले पृ. 52)

चिदात्मा स्वतन्त्रः ज्ञाता कर्ता शक्तिमान् शिवो महेश्वरः प्रकाशविमर्शात्मक इति त्रिकदार्शनिकाः प्रतिपद्यन्ते । स्वातन्त्र्यं, कर्तृत्वं, ज्ञातृत्वं, शक्तिमत्त्वं, विमर्शात्मकत्वं च वेदान्तब्रह्मणि नास्तीति प्रतिपादितमेव पूर्वम् । अत एव तत्रैश्वर्यं नास्तीति स्वयं भगवत्पादशङ्कराचार्या अस्मिन्नर्थे प्रमाणम् ।

"तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तिमत्त्वं च । न परमार्थतो विद्ययाऽपास्तसर्वोपाधिस्वरूपे आत्मनीशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते । (ब्रह्मसूत्रशाङ्करभाष्ये 2.1.14)

'नेह नानास्ति किञ्चन' इति सर्वस्य निषेधे सर्वज्ञत्वं सर्वशक्तिमत्त्वं च न घटते । अत ईश्वरबुद्धिर्वेदान्तिनां मिथ्याज्ञाननिमित्ता मायीयाऽविद्याविजृम्भितेति च पर्यवस्यति । अनिर्वाच्या चेयमविद्या न संगच्छत इत्याहुरभिनवगुप्तपादाः **प्रत्यभिज्ञाविमर्शिन्याम् (2-4-2)**–

"अनिर्वाच्येयमविद्या इति चेत् । कस्यानिर्वाच्येति न विद्मः । स्वरूपेण च भाति न च निर्वाच्येति किमेतत् ।"

सोमानन्दः शिवदृष्टौ विविधवेदान्तमतान्युल्लिख्य खण्डयित्वा च[12] सर्वेषां भावानां सर्वात्मकतां शिवरूपतां च साधयति-

सर्वे सर्वात्मभावेन सर्वज्ञा वा व्यवस्थिताः ।
सर्वे भावा स्वमात्मानं जानन्तः सर्वतः स्थिताः ॥ (5.104)

अन्यच्च–

सर्वे सर्वात्मका भावाः सर्वसर्वस्वरूपतः ।
सर्वस्य सर्वमस्तीह नानाभावात्मरूपकैः ॥
मद्रूपत्वं घटस्यास्ति ममास्ति घटरूपता ।
नानाभावैः स्वमात्मानं जानन्नास्ते स्वयं शिवः ॥
चिद्व्यक्तिरूपकं नानाभेदभिन्नमनन्तकम् ।
एवं सर्वेषु भावेषु सर्वसाम्ये व्यवस्थिते ॥
तेन सर्वगतं सर्वं शिवरूपं निरूपितम् ।

(तत्रैव 5.107-110)

अयमर्थः सर्वसाम्यवादात्मकः सोमानन्देन बहु प्रपञ्चितः। तथा हि अन्यत्र–

एवं सर्वपदार्थानां समैव शिवता स्थिता ।
परापरादिभेदोऽत्र श्रद्दधानैरुदाहृतः ॥

(तत्रैव 1.48)

तस्मात्समग्राकारेषु सर्वासु प्रतिपत्तिषु ।
विज्ञेयं शिवरूपत्वं स्वशक्त्यावेशनात्मकम् ॥

(तत्रैव 3.17)

अतः सर्वेषां भावानां ज्ञातृज्ञानज्ञेयादीनां च साम्यं शिवरूपत्वं च वास्तवमद्वयं त्रिकशासने।

यतो हि चिदात्मा देवः स्वस्वातन्त्र्यशक्त्या निरुपादानं विश्वमुन्मीलयति ततस्तस्यैश्वर्यमपराहतम् । अत एवाहुरुत्पलाचार्या "अन्तःस्थितमेवविश्वं बाह्यतया निरुपादानं प्रकाशयति (**ईश्वरप्रत्यभिज्ञा** 1.5.7)।

कूटस्थनित्यनिर्विकारस्थितिर्निर्विमर्शात्मिका सती न केवलमैश्वर्यमपि तु चैतन्यमपि निरसेत् । तथा हि अभिनवगुप्तपादाः–

अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः ।
महेश्वरत्वं संवित्त्वं, तदत्यक्ष्यद्घटादिवत् ॥

(तन्त्रालोके 3. 100-1)

सकलं जगदाभास्यात्मनि च सततं प्रतिबिम्बतया व्यवस्थाप्य महेश्वरः परमार्थतो व्यवहारतश्च अद्वय एवास्ते–

निर्मले मुकुरे यद्वद् भान्ति भूमिजलादयः ।
अमिश्रास्तद्वदेकस्मिंश्चिन्नाथे विश्ववृत्तयः ॥ (तन्त्रालोके 3. 4)

अयमभेदसारो भेदनिर्वाहकः प्रतिबिम्बवादः परमार्थसारे विशदं विवृतोऽभिनवगुप्तपादैः–

दर्पणबिम्बे यद्वन्नगरग्रामादिचित्रमविभागि ।
भाति विभागेनैव च परस्परं दर्पणादपि च ।
विमलतरपरमभैरवबोधात्तद्वद्विभागशून्यमपि ।
अन्योऽन्यं च ततोऽपि च विमक्तमाभाति जगदेतत्

(परमार्थसारः 12-13)

अतो भेदप्रसरे सत्यपि 'सर्वो ममायं विभवः' न तु मत्प्रतियोगिको मिथ्यारूपो वेति बुद्ध्या ईश्वराद्वयवादोऽपरिक्षितस्तिष्ठति । तथा हि आचार्योत्पलः–

सर्वो ममायं विभव इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रसारेऽपि महेशता ॥

(ईश्वरप्रत्यभिज्ञाकारिका 4.1.12)

अयमत्र प्रश्नः समुज्जृम्भते शक्तिमान् शिवः अनन्तशक्तिखचितत्वादेव स हि महेश्वरः । स्वातन्त्र्यशक्तिश्च सर्वशक्त्याक्षेपकत्वात् प्रधानं किन्तु शक्तिशक्तिमद्द्वय-स्वीकारे कथमीश्वराद्वयवादः आस्थीयते? अत्र विवेककारस्य (1-69 कारिकास्थं) व्याख्यानं स्पष्टमुत्तरम्–

"यतो भावस्य यस्य कस्यचन सतः पदार्थस्य स्वमेव रूपं फलभेदात् भेदारोपेण शक्ति इति प्रमातृभिः परिकल्प्यते न त्वसौ वस्तुतः पदार्थान्तरं किञ्चित्, अतः शक्तिशक्तिमत्परिकल्पने क्रियमाणेऽपि, स एवाद्वयमयो विभुः, न काचिदद्वयखण्डना इति ।" तदुक्तम्-

"फलभेदादारोपितभेदः पदार्थात्मा शक्तिः । शक्तीनामपि परस्परं भेदो नास्ति । यतो हि परमेश्वरस्य परिकल्पितेऽपि शक्तीनामानन्त्येन कश्चिद्भेदः इति न कदाचिदीश्वराद्वयवादक्षतिः" (विवेक 1-70) ।

भासमानश्च भेदः भानैकस्वभावान्नातिरिच्यत इति नाद्वयवादक्षतिः । परमेश्वर-स्येच्छाद्यवान्तरशक्तयः स्वातन्त्र्याख्यशक्त्यैकरूपा इति निश्चयः । तथा हि अभिनवगुप्तपादाः

एक एवास्य धर्मोऽसौ सर्वाक्षेपेण विद्यते ।
तेन स्वातन्त्र्यशक्त्यैव तदैश्वर्यं परमेशितुः ॥ (तन्त्रालोके 1.10)

इयं ह्यवान्तरशक्तिसहस्रसमाढ्यस्वातन्त्र्यशक्तिस्तत्तद्भेदोद्भासेऽपि परप्रकाशा-भिन्नस्वभावा भासते । न केवलमियं शक्तिरपि तु शिवः स्वयमेवाविलुप्तविभवः सन् प्रमेयतामापादित इवावभासते ।

स्वातन्त्र्यादद्वयात्मानं स्वातन्त्र्याद्भावनादिषु ।
प्रभुरीशादिसंकल्पैर्निर्माय व्यवहारयेत् ॥

(ईश्वरप्रत्यभिज्ञाकारिका 1.5. 15)

एवं शक्तिर्गुणो धर्मोऽवच्छेदकमुपाधिरंशो विभूतिर्वा नास्ति । सा हि स्वरूपं शिवस्य । तत एव शैवा बौद्धसम्मतं वेदान्तसम्मतं वाऽद्वैतं न सहन्ते । यथाहुः–

अन्तर्गतविश्ववीर्यमुच्छलत्सत्तात्मकं विसर्गविश्लेषानन्दशक्त्येकघनं ब्रह्म बृहद् व्यापकं बृंहितं च न तु वेदान्तपाठकांगीकृतकेवलशून्यवादाविदूरवर्ति ब्रह्मदर्शनम् इदम् ।

(परात्रीशिकाविवृति, पृ. 229)

सर्वसाम्यवादमूलेनीश्वराद्वयसमाश्रयणेन घटादिविषयकव्यवहारोऽपि परमेश्वर-स्वरूपानुप्रवेशेऽविरोधी संपद्यते । तथा हिं अभिनवगुप्तपादाः-

सर्वथा तावदत्र प्रमेये भगवत एव भेदने च अभेदने च स्वातन्त्र्यं घटगताभास-भेदाभेददृष्टिरेव च परमार्थाद्वयदृष्टिप्रवेशे उपायः समवलम्बनीयः न तु व्यवहारोऽपि अयं परमेश्वरस्वरूपानुप्रवेशविरोधी इति प्रतिपादितम् ।

(ईश्वरप्रत्यभिज्ञाविमर्शिनी 2. 3. 13 कारिकास्था)

अत्र भास्करीटीकाकारः–

घटादिविषयो व्यवहारोऽपि परमेश्वरस्वरूपे योऽनुप्रवेशस्तस्य विरोधी न भवति । तद्द्वारेणापि तत्स्वरूपपर्येषणरूपेण तत्सारभूतपरमेश्वरतत्त्वलाभात् ।

वेदान्तादिनिर्णीताद्वयाभासस्य बाह्यव्यवहारं प्रत्युपेक्षाभावमपेक्ष्य परमार्थपद-ग्रहणम् ।[13] बादरायणस्य ब्रह्मसूत्राणि (1.1.2-3, 1.2-18, 2. 1-6, 2.1-9, 2.1.24) ब्रह्म जगज्जन्मादिकारणं शास्त्रयोनिश्चेति प्रतिपादयन्ति, जगतः मिथ्यात्वं खण्डयन्ति (2. 1. 33) तस्य कर्तृत्वं ज्ञातृत्वं च समर्थयन्ति (2-1-22, 2-3, 18, 33), यज्ञादिक्रियानिष्पत्त्यै समाधिलाभार्थं च ब्रह्मणः कर्तृत्वमावश्यक-मिति निर्दिशन्ति (2.3.39) । अतः ब्रह्मसूत्रकृता वेदान्तमीमांसा न त्रिकसम्मतमर्थं विरुणद्धि । तत एवानेकानि उपनिषद्वाक्यानि शैवशास्त्रकारैः सादरमुद्ध्रियन्ते । अत्रायं पिण्डितार्थः । निर्विशेषाद्वैतवादिनां शाङ्करवेदान्तिनां ब्रह्म नित्यशुद्ध-बुद्धमुक्तस्वभावतया प्रकाशैकघनमपि जडमणिरिव निर्विमर्शमेव । अविद्याकृतं च द्वैतं तदद्वयं कलुषीकरोति । सेश्वरसांख्यानामीश्वरो पुष्करपलाशवत् सृष्टेर्निरपेक्षः । 'न प्रकृतिर्न विकृतिः पुरुषः' इति सांख्यकारिकोक्तेः सृष्टेः प्रकृत्युपादानतया ज्ञानस्य च बुद्धिधर्मतया तस्याकर्तृकत्वमज्ञातृत्वं च सुतरामापततः । सहकारिकारणपरतन्त्रस्य न्यायवैशेषिकाभिमतस्येश्वरस्य सर्वज्ञत्वं सर्वकर्तृत्वं जगदुपादानत्वं वा न घटते । सर्वं क्षणिकमुद्घोषयन्तः चित्तचैत्तनिषेधरसिकाः सौगताः प्रकाशविमर्शात्मकमनन्त-शक्तिसमाढ्यं परतत्त्वं न प्रतिष्ठापयन्ति । कर्ममीमांसकानां जैमिनीयानां वेदाभ्यास-जाड्यजनितं निरीश्वरवादित्वं सुप्रथितमेव । आश्रितश्च तैर्भेदवादः । स्यात्सरिति सपदि सप्तशो भङ्गीभिर्निमज्जतामुन्मज्जतां च स्याद्वादिनां नये उत्पादव्ययध्रौ-व्यादिरूपं द्रव्यमिति तत्र प्रकाशविमर्शात्मकं विश्वोत्तीर्णं विश्वपुश्च न निर्णीयते । अतस्त्रिकदर्शनाभिमत ईश्वराद्वयवादः सर्ववादविलक्षणः । अस्ति च तस्यान्यैर्दर्शनैः सह विरोधः ।[14] अत एव **प्रत्यभिज्ञाहृदये** (सूत्रं 8) आत्मतत्त्वमुपादाय दर्शनान्तरैः सह भेदः प्रकटितः । तच्चेत्थम्–

"चैतन्यविशिष्टं शरीरमात्मा इति चार्वाकाः । नैयायिकादयो ज्ञानादिगुणगणाश्रयं बुद्धितत्त्वप्रायमेवात्मानं संसृतौ मन्यन्ते । अपवर्गे तु तदुच्छेदे शून्यप्रायम् । अहंप्रतीतिप्रत्येय सुखदुःखाद्युपाधिभिः तिरस्कृत आत्मेति मन्वाना मीमांसका अपि बुद्धावेव निविष्टाः । ज्ञानसन्तान एव तत्त्वम् इति सौगता बुद्धिवृत्तिष्वेव पर्यवसिताः। प्राण एवात्मेति केचित् श्रुत्यन्तविदः । असदेव इदमासीदित्यभावब्रह्मवादिनः शून्यभुवमवगाह्य स्थिताः । माध्यमिका अपि एवमेव । परा प्रकृतिर्भगवान् वासुदेवः, तद्विस्फुलिंगप्राया एव जीवा इति पांचरात्राः परस्याः प्रकृतेः परिणामाभ्युपगमात् अव्यक्त एवाभिनिविष्टाः । सांख्यादयस्तु विज्ञानाकलभूमिम् अवलम्बन्ते । सदेव इदमग्र आसीत् इति ईश्वरतत्त्वपदमाश्रिता अपरे श्रुत्यन्तविदः । शब्दब्रह्ममयं पश्यन्तीरूपमात्मतत्त्वमिति वैयाकरणाः श्रीसदाशिवपदमध्यासिताः । एवमन्यदपि अनुमन्तव्यम् ।" एतदेव प्रकारान्तरेणान्यत्रापि विततम् ।

उक्तं चागमे–

बुद्धितत्त्वे स्थिता बौद्धा गुणेष्वेवार्हताः स्थिताः
स्थिता वेदविदः पुंसि अव्यक्ते पाञ्चरात्रिकाः ॥
वैष्णवाद्यास्तु ये केचिद्विद्यारागेण रञ्जिताः ।
न विदन्ति परं देवं सर्वज्ञं ज्ञानशालिनम् ॥

'मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः' इत्यभियुक्तोक्त्या मोक्षस्यात्मज्ञानरूपत्वादात्मस्वरूपनिरूपणेन दर्शनान्तरेष्वास्थितं मोक्षस्वरूपं[15] प्रकटीभवति । तच्च परमशिवत्वलाभाय पूर्णाहन्ताप्रथायै वा नालं भवत्यतो नैरात्म्यवादिनो बौद्धदय बुद्धितत्त्वान्तबन्धविगलनान्मुक्ता अपि तदूर्ध्ववर्त्यध्वान्तरावच्छेदस्थितेरमुक्ता एव ।[16] तथैव श्रीसदाशिवपदपर्यन्तमास्थितानामात्मवादिनामपि न शिवत्वलाभः । अत एवाहुरभिनवगुप्तपादाः–

सांख्यवेदादिसंसिद्धाञ्छ्रीकण्ठस्तदहर्मुखे ।
सृजत्येव पुनस्तेन न सम्यङ्मुक्तिरीदृशी ॥[17]

(तन्त्रालोके 6-152)

तत्र 'अज्ञानं संसृतेर्हेतुर्ज्ञानं मोक्षैककारणम्" (तन्त्रालोके 1.22) इति 'सर्वेषु शास्त्रेषु परिगीयते ।' अज्ञानं हि सामस्त्येनाप्रथात्मकमपूर्णख्यातिरूपं च । त्रिकदर्शनानुसारं ज्ञानमज्ञानं च द्विविधं पौरुषं बौद्धं च ।[18] अत्र पौरुषमज्ञानमेव संसारहेतुतया निर्दिष्टम् । अज्ञानशब्दस्यापूर्णं ज्ञानमर्थो न तु ज्ञानाभावः अन्यथा ज्ञानाभाववति लोष्टादिकेऽपि तस्य प्रसक्त्या तत्रापि संसरणकथा व्यासज्येत् । तदुक्तं तन्त्रालोके

अज्ञानमिति न ज्ञानाभावश्चातिप्रसङ्गतः ।
स हि लोष्टादिकेऽप्यस्ति न च तस्यास्ति संसृतिः ॥

अज्ञानमेवागमेषु मलं तच्च आणवं मायीयं कार्मं चेति त्रिविधमुपदिष्टम् ।[19] अणुभावं संकोचमापादयद्, अणौ परिमितप्रमातरि जायमानमणुना सम्बद्धं वा प्रथममाणवं मलं पूर्णज्ञत्वस्य कर्तृत्वस्य चापहस्तनेन द्विविधम् । तदुक्तम्–

स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता ।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः ।

(ईश्वरप्रत्यभिज्ञाकारिका, 3.2.4)

स्वस्वरूपहानौ सत्यां भिन्नवेद्यप्रथनमेव मायीयं मलम् । देहादेर्भिन्नप्रथने सति तद्द्वारा क्रियमाणं धर्माधर्मरूपं कार्मं मलम् । प्रथमं स्वरूपसंकोचः, तदनु देहाध्यासस्तदनु कर्तृत्वाभिमानेन धर्माधर्मकर्तृत्वमिति क्रमः । सर्वमेतन्मायाशक्त्यैव क्रियत इति मलत्रयस्यापि मायीयता ।[20] आणवं मलमन्तरङ्गं, मायासहितं कञ्चुकषट्कं मायीयं मलं सूक्ष्मं, देहादिरूपं स्थूलं बाह्यं च कार्ममलं[21] कोशत्रयमात्मन[22] । तेनैवायमणुरिति जीव इति पशुरिति वा व्यवह्रियते । परमेश्वरः स्वात्मप्रच्छादन क्रीडापण्डितः, अतो मलमागमेषु स्वात्मप्रच्छादनक्रीडामात्रं विदन्ति ।[23] निरतिशयनिर्मलस्य मलिनीभावः, पूर्णस्यापूर्णतया प्रथनं स्वातन्त्र्येण विजृम्भितं योग्यतामात्रमिति न मलत्रयस्य रागवत् तत्त्वान्तरत्वमाशङ्क्यम् । तदेवाह–

योग्यतामात्रमेवैतत् भावव्यच्छेदसङ्ग्रहे ।
मलस्तेनास्य न पृथक् तत्त्वभावोऽस्ति रागवत् ॥

(तन्त्रालोके 9, 63)

एतन्मलत्रयस्य इच्छा-ज्ञान-क्रियाशक्तीनां संकोचेन संग्रहेण विवेचनं **प्रत्यभिज्ञाहृदय**कारेण (पृ.60) कृतम् । तच्चेदम्–"**अप्रतिहतस्वातन्त्र्यरूपा इच्छाशक्तिः संकुचिता सती अपूर्णम्मन्यतारूपमाणवं मलम् । ज्ञानशक्तिः क्रमेण संकोचात् भेदे सर्वज्ञत्वस्य किञ्चिज्ज्ञत्वप्राप्तेः अन्तःकरणबुद्धीन्द्रियतापत्तिपूर्वमत्यन्तं संकोचग्रहणेन भिन्नवेद्यप्रथारूपं मायीयं मलम् । क्रियाशक्तिः क्रमेण भेदे सर्वकर्तृत्वस्य किञ्चित्कर्तृत्वाप्तेः कर्मेन्द्रियरूपसङ्कोचग्रहणपूर्वकम् अत्यन्तपरिमिततां प्राप्ता शुभाशुभानुष्ठानमयं कार्ममलम् ।**"

तत्र स्वातन्त्र्यहानिरूपमाणवं मलं विज्ञानकेवलनाम्नि प्रमातरि, स्वातन्त्र्याबोधरूपमाणवं कार्मं विकल्पेन च मायीयं मलं प्रलयाकलनाम्नि प्रमातरि देवादिषु च सर्वेषु भविषु (संसारिषु) त्रिविधं मल[24]मिति ईश्वर**प्रत्यभिज्ञाकारिकायां** तद्विमर्शिन्यां (3.2.6-10 भास्करी, भा 2. पृ. 250-255) च स्पष्टीकृतम् । ज्ञानेन मोक्ष इति सर्वशास्त्रसम्मतम् । वेदान्तिनो ब्रह्मणि अज्ञाननाशायैव वृत्तेर्व्याप्तिं मन्यन्ते फलव्याप्ततां त्वस्या निवारयन्ति ।[25] त्रिकदर्शनं ज्ञानं नाम प्रत्यभिज्ञेति व्यवस्थापयति । ज्ञातस्यापि विशेषतो निरूपणम् अनुसन्धानात्मकं, तयोरैक्यप्रतिपत्तिः, आभिमुख्येन प्रकाशो वा प्रत्यभिज्ञेति लक्षयन्ति । तदुक्तम्-

"**प्रतीपमात्माभिमुख्येन ज्ञानं प्रकाशः प्रत्यभिज्ञा । प्रतीपं स्वात्मावभासो हि न अननुभूतपूर्वोऽविच्छिन्नप्रकाशकत्वात् स तु तच्छक्त्यैव विच्छिन्न इव विकल्पित इव लक्ष्यते ।**

प्रत्यभिज्ञा च भातभासमानरूपाऽनुसन्धानात्मिका । स एवायं चैत्र इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानम् ।"

(ईश्वरप्रत्यभिज्ञाविमर्शिन्यां भा 1. पृ. 37)

स्वात्मा सर्वदा सन्निहित इति तस्य चैत्रस्येव मध्ये वियोगो नात्र न्यायनय इव कल्पनीयः । अपूर्णतया ज्ञातस्य प्रत्यक्चैतन्यस्य पूर्णताप्रथनमेवात्र प्रत्यभिज्ञा । सा च बाह्यप्रमेयमूलान्वेषणेन प्रमातृविश्रान्तिमनुसन्दधाति । तदुक्तम्–

"स्फुटतरं भासमाना ये नीलसुखादयस्तेषां प्रमाया अन्वेषणेन किंमूलेति-विचारणेन बाह्यप्रमाविचारे क्रियमाणे तन्मूलभूतस्य प्रमातुरयत्नं सिद्ध्यति घटान्वेषणेन मृदः" । (तत्रैव पृ. 39) बाह्यविषयकप्रमायाः परिमितप्रमातरि तस्य च परमप्रमातरि प्रत्यभिज्ञानाज्जीवेश्वरयोरैक्यफला भवति प्रत्यभिज्ञा तदैक्यं च ईश्वरस्वरूपस्वात्मप्रत्यभिज्ञान्नातिरिच्यते । वेद्यवेदकवेदनरूपतयेच्छाज्ञानक्रियादिभिश्च सततं सन्निहितोऽपि स्वात्मा पूर्णतया अपरिज्ञातत्वाद्रतिं नानुबध्नाति आन्तरीं प्रीतिञ्च न जनयति । प्रत्यभिज्ञा न खलु बाह्यार्थक्रिया या प्रत्यभिज्ञानं विनैव सहकारिसाकल्ये सति कार्यं जनयति । यथा बीजमप्रत्यभिज्ञातं सदप्यङ्कुरं जनयति । इयन्तु प्रमातृविश्रान्तिचमत्कारसारा प्रीत्यादिरूपाऽऽन्तरी स्फुरत्ता ।[26] यथा तन्व्या अन्तिके स्थितोऽपि जननिर्विशेषतया परिज्ञातः कान्तो रतिं न बध्नाति स एव केनाप्युपायेन प्रत्यभिज्ञातः सन् निरतिशयप्रेमपात्रं भवति तयोः सामरस्यं चानुभावयति तथैव मोहापसारणेन प्रत्यभिज्ञातः सन् स्वात्मा विश्वेश्वरः पूर्णाहन्ता-चमत्कारं वितनोति ।[27] इदमेव प्रत्यभिज्ञानं 'स्वशक्त्याविष्करणं' स्वशक्त्यभिव्यक्तेः मोहापसारणेनेश्वरस्वरूपपरामर्शो वा व्यपदेष्टुं शक्यते ।

तदुक्तम्–

किन्तु मोहवशादस्मिन्दृष्टेऽप्यनुपलक्षिते ।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञा प्रदर्श्यते ॥

(ईश्वरप्रत्यभिज्ञाकारिकायाम् 1.1.2.)

पूर्णताप्रत्यभिज्ञां कर्तुं परमशिवत्वलाभाय च त्रिकशास्त्रेषु भेददृष्टिप्रधानः आणवोपायः भेदाभेददृष्टिप्रधानः ज्ञानोपाय अभेददृष्टिप्रधानः शाम्भवोपाय इति चत्वार उपाया उपदिष्टाः । तत्र प्रथमे क्रियायाः, द्वितीये ज्ञानस्य तृतीये च इच्छायाः प्राधान्यादेते त्रय उपायाः क्रमेण क्रियोपायः ज्ञानोपायः, इच्छोपायश्चेति कथ्यन्ते । शाम्भवोपाय[28] एव परां काष्ठामधिरूढः आनन्दविश्रान्तः 'अनुपाय' इत्यभिनव-गुप्तेनोपदिष्टः । अत्र ईषदर्थे नञ् प्रयोगः[29] तदुक्तम्–"अयमेव पारमेश्वर-समावेशयोगः । समस्तमिदमेकं चिन्मात्रतत्त्वं कालेनाकलितं, देशेनापरिच्छिन्नम् उपाधिभिरम्लानम्, आकृतिभिरनियन्त्रितम्,.........स्वतन्त्रं तत्त्वं तदेवाहम् । तत्रैवान्तर्मयि विश्वं प्रतिबिम्बितं एवं दृढं विविञ्चानस्य पारमेश्वरः समावेशो

निरुपायक एव । तस्य च न मन्त्रपूजाध्यानचर्यादियन्त्रणा काचित् । (तन्त्रसारे पृ. 9) अनुपाय एव परमं ज्ञानम् अनुत्तरमिति प्रत्यभिज्ञाप्रक्रियायां संज्ञितम् । तथा हि-

ततोऽपि परमं ज्ञानमुपायादिविवर्जितम् ।
आनन्दशक्तिविश्रान्तमनुत्तरमिहोच्यते ॥ (तन्त्रालोके, 1.242)

क्रमसम्प्रदाये आणवोपाय आश्रीयते यत्र "उच्चारकरणध्यानवर्णस्थानप्रकल्पनैः"[30] समावेशः साध्यते । तत्रापि संवित्सन्निकृष्टतया प्राणोच्चारस्यान्तरङ्गत्वं देहगतकरणादेश्च बहिरङ्गत्वमास्थीयते ।[31] अस्मिन्नेवाणवोपाये **विज्ञानभैरवोपदिष्टा** धारणाः, कुण्डलिनीयोगः शैवध्यानविधयः, साधनायाः रहस्यविधयः बाह्यपूजायाः समग्रं कर्मकाण्डादिकं सर्वं संग्रह्यते । त्रिकदर्शननिरुपणमात्रपरत्वेन नात्र मया साधनास्वरूपं साधकैकसंवित्तिस्फुरणगोचरं मनागप्युन्मील्यते । न तत्र मेऽधिकारो योग्यता वा । तथापि सामान्यदृशा शास्त्रशब्दगम्यं साधनास्वरूपं संग्रह्य यत् किञ्चित् "काश्मीर की शैव परम्परा" इत्याख्ये ग्रन्थे मनाक् शिवानुग्रहेण स्पृष्टमिति तत एवावलोकनीयम् ।

चिदेकरूपोऽप्यन्यापहरूपत्वाद् भेदमयो नीलादिविकल्पः । तमभ्यासातिशयात् क्रमेण संस्कृत्य[32] संविदो विमला पूर्णाविकल्पस्फुटतावाप्तिरेव शाक्तोपायः ।[33] तथा हि विवेकः (5.5)—"**संस्कारश्चास्यास्फुटत्वादिक्रमेण स्फुटतमत्वापत्तिपर्यन्तं पारमार्थिकस्वात्मप्रत्ययरूपनिर्विकल्पज्ञानात्मत्वासादनम् ।**" अधिकारिभेदादुपायचातुर्विध्यप्रदर्शनेऽपि उपायनानात्वं तत्कृतश्च फलभेदो नाशङ्कनीयः । ज्ञानात्मकस्यैवोपायस्य मोक्षावाप्तावभ्युपगतत्वात् ।[34] परमार्थतस्तु निरवच्छिन्नप्रकाशः परमात्मा सर्वत एवावभासते इति स केनचिदप्युपायेनोपेयो नास्ति । अज्ञातज्ञापको अप्राप्तप्राप्तिकारी वा भवत्युपायः । अत एवोक्तम् ।

उपायजालं न शिवं प्रकाशयेत्
घटेन किं भाति सहस्रदीधितिः ।
विवेचयन्नित्थमुदारदर्शनः
स्वयंप्रकाशं शिवमाविशेत् क्षणात्[35] **।** (तन्त्रसारे 2.6)

वस्तुतस्तु बन्धो मोक्षो वापि न नाम कश्चिदस्ति बन्धनस्य तात्त्विकत्वे मोक्षाभावप्रसङ्गात् । अमुमेवाभिप्रायं गर्भीकृत्य बन्धमोक्षव्यवस्थां तात्त्विकीं नानुमन्यन्ते दार्शनिकाः । तदुक्तम्—

संसारोऽस्ति न तत्त्वतस्तनुभृतां बन्धस्य वार्तैव का
बन्धो यस्य न जातु तस्य वितथा मुक्तस्य मुक्तिक्रिया ।
मिथ्यामोहकृदेष रज्जुभुजगच्छायापिशाचभ्रमो
मा किञ्चित् त्यज मा गृहाण विरम स्वस्थो यथावस्थितः ॥
(तन्त्रालोकविवेके 1.331 उद्धृतम्)

स्वात्मप्रत्यभिज्ञानार्थं कथं तर्हि केषाञ्चन प्रवृत्तिरिति चेत् शिवस्य प्रसादः शक्तिपात एव वा तत्र हेतुरिति त्रिकशासनविदः । तेनैव भक्तेरुदयः[36] सद्गुरुप्राप्तिः[37] दीक्षाग्रहणं, साधनासु प्रवेशः सिद्धिश्च[38] । अयमेव शक्तिपात आत्मवर्तिनं विवेकमुद्दीपयति ।[39] सोऽयमनुग्रहरूप-प्रसादमूलोऽयं शक्तिपातः शिवस्वातंत्र्यसारो न पुनः अन्यनिमित्तापेक्षः । शक्तेः सापेक्षत्वे अनीश्वरत्वं प्रसज्येत ।[40] तत्त्वतश्च स्वात्मस्वातन्त्र्ये ज्ञानक्रियाशक्तीनामुदय एव शक्तिपातः । स्वात्मनः शिवाभिन्नत्वात् शक्तेश्च तत्र समवायात् ।

"दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्"[41]
"यमैवेष वृणुते तेन लभ्यः,"[42]

इत्यादीनि शास्त्रान्तरवचनान्यपि शक्तिपातमेवाभिव्यञ्जयन्ति । शक्तिपातस्यैव स्फुटं चिह्नमव्यभिचारिणी अनिवारितवीर्या च भक्तिः यया शिवत्वं व्यक्तिमेति ।[43]

परमेश्वरस्वरूपस्वात्मविषया न त्वन्यदेवताविषया शक्तिपातलक्षणा अनुध्या (अनुसन्धानमेव) भक्तिः ।

"न पादपतनं भक्तिर्व्यापिनः परमेशितुः ।
भक्तिर्भावस्वभावानां तदेकीभावभावनम् ॥"

(क्षेमेन्द्रेण गीतानिष्यन्दे उद्धृतम्)

एषैव एकीभावभावनया जायमाना मतिः शाङ्करी शक्तिरिति **विज्ञानभैरवे**[44] आम्नाता। तस्याः भावनयैव शिवो भवति । भक्तिकल्पपादपस्यैव च 'अणिमादिगुणावाप्तिः सदैश्वर्यं भवक्षयः पल्लवाः' सन्ति । सेयं भक्तिस्त्रिकदर्शनानुसारं शिवस्यैव शिवोपास्तिरस्ति । शैवी चेयं भावना प्रतिक्षणं प्रतितिष्ठति–

शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत् ।
शिवो यजति यज्ञश्च यः शिवः सोऽहमेव हि ॥

एतद्भावनाभरितान्तःकरणः भैरवीभावपूर्णः समत्वधिया[45] सततं लोकानुग्रहपरायणस्तिष्ठति । लोककर्तव्यं लोकानुग्रह एव परमशिवसमावेशस्यानुत्तरस्य फलम्। तथा चोक्तम्–

समस्तयन्त्रणातन्त्रत्रोटनाटंकधर्मिणः ।
नानुग्रहात्परं किञ्चिच्छेषवृत्तौ प्रयोजनम् ॥[46]

(तन्त्रालोके 2. 38)

संविदद्वैतशालिनो जीवन्मुक्तस्य योगिनः स्नानशुद्ध्यर्चनाहोमध्यानजपपूजादिकं बाह्यं किमपि कर्म कर्तव्यं न भवति ।

"एवं स्वदेहं बोधैकपात्रं गलितभेदकम् ।
पश्यन्संवित्तिमात्रत्वे स्वतन्त्रे तिष्ठति प्रभुः ॥"

(तन्त्रालोके 4.119-20) 20)

गुरुतः शास्त्रतः स्वतो वा बाह्यान्तरचर्याप्राणायामादिक्लेशप्रयासकलाविरहात्सु-घटमनुत्तरं त्रिकदर्शनं परिभाव्य अपरिमितेच्छाज्ञानक्रियाशक्तीनामभिव्यक्त्या आत्मनो विश्वकर्तृत्वलक्षणमैश्वर्यं स्वातन्त्र्यं चानुभवति सर्वोऽपि

सर्वो ममायं विभव इत्येव परिजानतः ।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता ॥

(ईश्वरप्रत्यभिज्ञाकारिका 4.1.12)

परमाद्वैतसंविद्रूपात् परमशिवादन्यत्सर्वं पारतन्त्र्यात्पाश एव ।

यत् किञ्चित्परमाद्वैतसंवित्स्वातन्त्र्यसुन्दरात् ।
पराच्छिवादुक्तरूपादन्यत्तत्पाश उच्यते ॥

(तन्त्रालोके 1.14)

इच्छाज्ञानक्रियाशक्तिमन्तः सर्वेऽपि जीवाः तत्त्वतः स्वतन्त्राः परमेश्वररूपा एव ।

इच्छाज्ञानक्रियापूर्वा यस्मात् सर्वाः प्रवृत्तयः ।
सर्वेऽपि जन्तवस्तस्मादीश्वरा इति निश्चितम् ॥

(मानसोल्लासे 2.44)

इदमेवानुत्तरं त्रिकदर्शनम् । अत एवाहुरभियुक्ताः

सन्ति पद्धतयश्चित्राः स्रोतभेदेषु भूयसा ।
अनुत्तरषडर्धार्थक्रमे त्वेकापि नेक्ष्यते ॥ (तन्त्रालोके 1.14)

एतद्दर्शनभावितान्तःकरणेन कविकुल गुरूणा कालिदासेन कुमारसम्भवे शक्तिरूपया उमया (मालिनीक्रमेण उ.म्, अ, इति प्रणवरूपया) ब्रह्मचारिवेषावृतस्य शिवस्य प्रत्यभिज्ञानं निबद्धम् ।

इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ।

प्रतिश्रुतं च **'अद्य प्रभृत्यवनताङ्गि तवास्मि दासः क्रीतस्तपोभिरिति'**

(कुमारसंभवे 5 सर्गे)

"चन्द्रचन्द्रिकयोर्यद्वद्यथा वागर्थयोरिव"

"अर्थः शम्भुः शिवा वाणी तस्मै तस्यै नमो नमः" इत्यादिकं शक्तिशक्तिमद्रूपं विभावयता च रघुकारेण तयोः वागर्थयोरिव सम्पृक्तिर्वन्दिता । अभिज्ञानशाकुन्तले च शुद्धशीलायाः शक्तिरूपायाः शकुन्तलायाः मोहापगमे[47] दुष्यन्तेन[48] मारीचाश्रमे प्रत्यभिज्ञानं रूपितम् ।[49] काव्ये एकत्र शिवस्यापरत्रनार्याशक्तेः साक्षात्कारः । महाकविकाव्यालोचनं प्रत्यभिज्ञानमन्तरा न सम्यग्भवतीति ध्वनिकृतस्तत्र प्रमाणम् । यदाहुः—

"सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥ (ध्वन्यालोके 1.8)

अभिनवगुप्तस्य काव्ये नाट्ये च सर्वैः काव्यशास्त्रपरमाचार्यैः स्वीकृतः रससिद्धान्तः प्रत्यभिज्ञापरपर्यायं त्रिकदर्शनमेवाश्रयते । यथोक्तं तेन स्वयमेव—

"निर्विघ्नास्वादरूपा च रसना । तद्गोचरीकार्याः चित्तवृत्तयो रसा न-वेति । अयमर्थः अभिनवभारत्यां नाट्यवेदविवृतौ वितत्य व्युत्पादितोऽस्माभिरिति तत्कुतूहली तामेवावालोकयेदिह तु प्रकृतविघ्नकारित्वान्न विवृतः । तस्मादुपचरितस्यं स्वसंवेदनरूपतानान्तरीयत्वेनावस्थितस्य स्वतन्त्रस्यैव रसनैकघनतया परामर्शः परमानन्दा निर्वृत्तिश्चमत्कार उच्यते ।"

(ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यां भा 2 पृ0 108-9)

इदञ्चास्य विश्वकल्याणार्थं प्रवृत्तस्य त्रिकदर्शनस्य भरतवाक्यम्—

शुभमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखीभवन्तु लोकाः ।

(विवृतिविमर्शिन्याःप्राचीनपाण्डुलिपौ)

---

1. (i) नृसिंहोत्तरतापिन्युपनिषत् 8.4. (ii) मुक्त्युपनिषत् 1.34; 2.73.
2. मैत्र्युपनिषदि (6.7) यत्राद्वैतीभूतं विज्ञानम्, बृहदारण्यकोपनिषदि (4.3.32) 'सलिल एको दृष्टाऽद्वैतो भवति' इत्यत्र परोक्षं माण्डूक्ये (7) 'शान्तं शिवमद्वैतं चतुर्थम्' इत्यत्र च साक्षात् अद्वैतपदमुपलभ्यते । नान्यत्रोपनिषत्सु प्रधानतया प्रख्यातासु अद्वैतपदस्य अद्वयपदस्य वा व्यवहारो दृष्टः ।
3. शंतपथब्राह्मणममुमेवार्थमनुवदति (द्र. 5.1.2-10)
4. अदितिद्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
   विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥ (ऋक्, 1.88.10)
5. सोऽयमर्थः पूर्वतनकारिकायां विशदं प्रतिपादितः ।
   यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः ।
   तथा जाग्रद् द्वयाभासं स्पन्दते मायया मनः ॥3.29॥
   परस्ताच्च द्वयमेव द्वैतशब्देन विवृतम्—
   मनोदृश्यमिदं द्वैतं यत् किञ्चित् सचराचरम् ।
   मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते ॥3.31॥
6. बौद्धवेदान्तसन्दर्भाणां बहूनां कृते द्र. अद्वैतदर्शनम्, आर. करुणाकरन्, पंचमविश्वसंस्कृत-सम्मेलनम्, वाराणसी
7. अस्तित्वनास्तित्वरूपद्वयाभावः अथवा शाश्वतोच्छेदरूपद्वयाभावः अद्वयम्—द्र. तत्रैव, पृ. 9. वस्तुतो विषयचित्तद्वयाभावो बौद्धानामभिलषितोऽद्वयार्थः प्रतिभाति । तथाहि महायान-सूत्रालङ्कारे असङ्गः—'अर्थान् स विज्ञाय च जल्पमात्रात् सन्तिष्ठते तन्निभचित्तमात्रे । प्रत्यक्षतामेति च धर्मधातुस्तस्माद्वियुक्तो द्वयलक्षणेन ।
   तथैव वसुबन्धुः—
   चित्तमात्रोपलम्भेन ज्ञेयार्थानुपलम्भता ।
   ज्ञेयार्थानुपलम्भेन स्याच्चित्तानुपलम्भता ॥

8. वस्तुतस्तु बौद्धैरद्वयशब्देन पदार्थे पदार्थबुद्धौ च ऐक्यमिति व्यवहारः क्रियते । तेषामाशयः–पदार्थस्तु नास्त्येव, यो हि पदार्थः प्रतीयते स तु बुद्धिरेव । अन्ते बुद्धिरपि नास्ति इति। अद्वैते तु कश्चित् प्रकारः भेदो न वर्तते । यत्तु सजातीयविजातीयस्वगत-भेदशून्यं तत् सत् वर्तते । अयमेव अद्वैताद्वयपदार्थयोर्भेदः । करुणाकरन्, अद्वैतदर्शनम्, पंचमविश्वसंस्कृतसम्मेलनम्, वाराणसी ।
9. अद्वैतद्रवसम्पर्कात् सिद्धान्तवैष्णवाद्याः पराङ्मुखत्वमायान्ति। अयमर्थः श्रीजयरथेन 'स्वक्रमं तु यजेन्मध्ये द्वैताचारं तु वर्जयेत्' इत्यागमवचनमुद्धृत्य पद्यद्वयेन सिद्धान्तादीनां पशुत्वं निर्जीवत्वं च मन्त्रप्रसङ्गे शास्त्रोक्तपद्यद्वयेन निर्दिष्टम्–

सिद्धान्तवैष्णवबौद्धाः वेदान्ताः स्मार्तदर्शनाः ।
ते प्रयत्नेन वा वर्ज्या यस्मात्ते पशवः स्मृताः ॥
अद्वैतद्रवसम्पर्कात् सन्निधानं त्यजन्ति ते ।
पराङ्मुखत्वमायान्ति निर्जीवाः जीववर्जिताः ॥ –तन्त्रालोकविवेकः 29.74

10. प्रमाता हि व्यवस्यति इदं शुद्धमिदमशुद्धमिति वस्तुधर्मत्वे हि अनयोरशुद्धं न कदाचिदपि शुद्ध्येत् शुद्धमपि वा नाशुद्धं स्यात् । न हि नीलमनीलमपि कदाचित् भवेत् स्वभावस्या-न्यथाकर्तुमशक्यत्वात् । तत्रैव 4.221
11. विस्तरार्थं द्रष्टव्यम् - तन्त्रालोके 4.213-15; 224, 243-4
12. शिवदृष्टौ षष्ठाह्निके –

यथा प्रकल्पिता चित्रा चित्रब्रह्मादिवादिता ।
नानात्मवादितां यावत् तत्सर्वं प्रविचार्यताम् ॥3॥
यत्र ब्रह्मोच्यते चित्रं कैश्चिद्वेदान्तवादिभिः ।
एकस्य चित्रता केन हेतुना ब्रह्मणो भवेत् ॥4॥
येऽन्ये वेदान्तविद्वांसः आत्मब्रह्मैव विश्वताम् ।
यात्युपादानरूपत्वात् तथान्ये भ्रान्तिरूपताम् ॥8॥
विश्वं न सत्यरूपत्वं तथान्ये त्वात्मवादिनः ।
भूतजीवपरात्मत्वं ये चान्ये नेतिवादिनः ॥9॥
यस्यां प्रतीतौ नेत्यस्य प्रसरो न प्रवर्तते ।
तद्ब्रह्मेति वदन्त्येके ये स्फुलिंगात्मवादिनः ॥10॥
प्रतिबिम्बतया चान्ये ये वा सर्गमुखे स्वयम् ।
ब्रह्मैव गृह्णात्यात्मानं ततो भेदोपपादनम् ॥11॥
इत्याहुर्येऽपि क्रीडार्थमेवमात्मा व्यवस्थितः ।
इत्यूचुर्येऽप्रबुद्धत्वं पश्चाद् ब्रह्म प्रबुध्यते ॥12॥
देहे देहे पृथक्त्वं तु तथा भेदो भवात्मकः ।
जलधारांशुमन्न्यायो येषां वा समवस्थितः ॥13॥
अविद्यां वेत्यविद्यैव बध्नात्यात्मानमेव वा ।
सैवेति वादो येषां वा तेषां वेदान्तवादिनाम् ॥14॥
सर्वेषामविद्यैव कल्प्या ब्रह्मणि संगता ।
तथा भावेष्वसत्यत्वमित्यवश्यमवस्थितम् ॥15॥

13. वेदान्तखण्डनार्थं द्र. भास्करी पृ. 10-15
14. (i) नानादर्शनैश्चास्मिन् शैवाद्वैते नो विरोधः । शिवदृष्टिवृत्तौ पृ. 122
(ii) न हि सर्वत्र दर्शने सर्वैरर्थैस्तुल्यैर्भाव्यम् । तत्रैव पृ. 163
15. इह तावदात्मज्ञानं मोक्ष इत्यविवादः । अतो यदेवात्मनो लक्षणं तदेव मोक्षस्य इति तन्नान्तरीयकत्वादेवास्य लक्षणसिद्धेः । तन्त्रालोकविवेके : 1.31
16. तत्रैव 1.34.
17. श्रीस्वच्छन्दशास्त्रेऽपिः:

लौकिकानां पुनः सृष्टिः पुनः संहार एव च ।

संसारचक्रमारूढा भवन्ति घटयन्त्रवत् ॥
इत्यादि सामान्येन अभिधाय
मुक्तं च प्रतिबन्धात्तं पुनर्बध्नाति चेश्वरः ।
बन्धः संसारतो भूयो यावद्देवं न विन्दति ॥ तत्रैव 1.34.
दर्शनान्तर प्रसिद्धमुक्तिस्वरूपाणामसम्यक्त्वविवेचनार्थं तन्त्रालोकविवेको द्रष्टव्यः 1.33

18. ज्ञानाज्ञानस्वरूपं यदुक्तं प्रत्येकमप्यदः ।
द्विधापौरुषबौद्धत्वभिदोक्तं शिवशासने ॥
तत्र पुंसो यदज्ञानं मलाख्यं तज्जमप्यथ ।
स्वपूर्णचित्क्रियारूपं शिवतावरणात्मकम् ॥
संकोचिदृक्क्रियारूपं तत् पशोरविकल्पितम् ।
तदज्ञानं न बुद्ध्यंशोऽध्यवसायाद्यभावतः ॥ तन्त्रालोके 1.36-38

19. (1) मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम् ।
इतिप्रोक्तं तथा च श्रीमालिनीविजयोत्तरे ॥ तन्त्रालोके, 1.23.
अज्ञानं किल बन्धहेतुरुदितः शास्त्रे मलं तत्स्मृतम् । तन्त्रसारे आ.1.पृ. 5

20. भिन्नवेद्यप्रथात्रैव मायाख्यं जन्मभोगदम् ।
कर्तर्यबोधे कार्मं तु मायाशक्त्यैव तत्त्रयम् ॥ तत्रैव 3.2-5.

21. मलशब्दस्य पुंनपुंसकयोः प्रयोगः ।

22. परमावरणं मल इह सूक्ष्मं मायादिकञ्चुकं स्थूलम् ।
बाह्यं विग्रहरूपं कोशत्रयवेष्टितो ह्यात्मा ॥ परमार्थसारे 24

23. स्वात्मप्रच्छादनक्रीडामात्रमेव मलं विदुः ।

24. देवादीनां च सर्वेषां भविनां त्रिविधं मलम् ।
तथापि कार्ममेवैकं मुख्यं संसारकारणम् ॥ ईश्वरप्रत्यभिज्ञाकारिका 3.2.10

25. फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥ पञ्चदशी 6.90

26. न हि बीजमप्रत्यभिज्ञातं सति सहकारिसाकल्ये नाङ्कुरं जनयति, तत् क्व आत्मप्रत्यभिज्ञाने निर्बन्धः? उच्यते, द्विविधा अर्थक्रियाऽस्ति, बाह्या चाङ्कुरादिका, प्रमातृविश्रान्तिचमत्कार-सारा च प्रीत्यादिरूपा। तत्र आद्या सत्यं प्रत्यभिज्ञानं नापेक्षते, द्वितीया तु तदपेक्षते एव।
ईश्वरप्रत्यभिज्ञाविमर्शिनी 4.1.16

27. तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा। लोकस्यैष तथाऽभिनवेक्षितगुणः स्वात्मापि विश्वेश्वरः नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता । प्रत्यभिज्ञाकारिका-4.1.17

28. शाम्भवोपायस्वरूपम्
मत्त एवोदितमिदं मय्येव प्रतिबिम्बितम् ।
मदभिन्नमिदं चेति त्रिधोपायः स शाम्भवः ॥ तन्त्रालोकेः 3. 280

29. अनुपाय इति नोपायनिषेधमात्रम् । तन्त्रालोकविवेके 1.42

30. उच्चारकरणध्यानवर्णस्थानप्रकल्पनैः ।
यो भवेत् स समावेशः सम्यगाणव उच्यते ॥ मालिनीविजयोत्तरतन्त्रे 2. 21
अस्य विस्तरेण विवेचनं तन्त्रालोके 5, 6, 11, 16, 29, 32 आह्निकेषु कृतम् ।

31. केचिदुपायाः संविदि सन्निकृष्टा केचिच्च विप्रकृष्टाः...इति नीत्या बुद्ध्याद्यपेक्षया तत्र प्राणस्यान्तरङ्गत्वात्, तद्गतमुच्चारादिसन्निकृष्टं तदपेक्षया च बुद्धिगतं ध्यानं विप्रकृष्टं, ततोऽपि देहगतं करणादि ।......तेनाणुषु भेदिषु उपायेषु भवः इत्याणवः । विवेके 5.6

32. स्वात्मसंवित्तेर्निरतिशयपूर्णत्वान्न किञ्चिदपि तत्र अपास्यमाधेयं वा सम्भवति अत एवानुपायाह्निके "अत्र तावत् क्रियायोगो नाभ्युपायत्वमर्हति" इति स्पष्टीकृतम् । तथापि स्वात्मप्रच्छादनक्रीडापण्डितस्य अनावृतस्वरूपेऽपि यत् स्वाच्छन्द्येनात्माच्छादनं मायया क्रियते तेन द्वैतम् उद्भाव्यते तद्द्वैतस्यापासनमेवात्र संस्कारो विवक्षितः। स च

स्फुटताभावि-प्रस्फुटन्-स्फुटितात्मकं-स्फुटतमरूपेण चतुर्धा । स च द्वैतपादपः सत्तर्ककुठारेण छिन्द्यते। सत्तर्कः च प्राणायाम-ध्यान-प्रत्याहार-धारणा-तर्क-समाधिरूपस्य शैवशास्त्रोपदिष्ट-स्य षडङ्गयोगस्योत्तममङ्गम् । धाराधिरूढस्तर्क एव परां काष्ठामुपगतो भावनेति व्यपदिश्यते । भावनामयमेव च परमं ज्ञानमिति सर्वं शाक्तोपायनिरूपके तन्त्रालोकस्य चतुर्थाह्निके निरूपितम् ।

33. ततः स्फुटतमोदारताद्रूप्यपरिबृंहिता ।
संविदभ्येति विमलामविकल्पस्वरूपताम् ॥ तन्त्रालोके 4.6

34. एक एव ज्ञानात्मा मोक्षावाप्तावुपाय इति न उपायनानात्वम् । अत एव तत्फलभूते मोक्षेऽपि न कश्चिद् भेदः । ....काल्पनिकेऽपि हेतुफलयोर्भेदे ज्ञानात्मा एक एव उपायोऽभ्युपगत इति उपायनानात्वस्यैवाभावात् को नाम फलभूतेऽपि मोक्षे भेदः स्यात्। तन्त्रालोकविवेके 1.165

35. उपायैर्न शिवो भाति भान्ति ते तत्प्रसादतः । तन्त्रालोकविवेके 2. 2. इत्यत्रोद्धृतम् ।

36. तस्यैव हि प्रसादेन भक्तिरुत्पद्यते नृणाम् । मालिनीविजयवार्तिकम् 1.697

37. (i) भुक्तिमुक्तिप्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति। मालिनीविजयोत्तरे
(ii) असद्गुरुतस्तु सद्गुरुगमनं शक्तिपातादेव । तन्त्रसारे पृ. 122

38. शक्तिपातोदये जन्तोर्येनोपायेन देशिकः ।
करोत्युद्धरणं तत्तन्निर्वाणाय प्रकल्पते ॥ तन्त्रालोके 25, 23

39. स्वातन्त्र्यसारश्चासौ परमशिवः शक्तेः पातयिता इति निरपेक्ष एव शक्तिपातो यः स्वरूपप्रथाफलः। तन्त्रसारेः पृ. 122

40. इत्थं पुराणशास्त्रादौ शक्तिः सा पारमेश्वरी ।
निरपेक्षैव कथिता सापेक्षत्वे ह्यनीशता । मालिनीविजयवार्तिके 1. 618

41. भगवद्गीता 11.

42. कठोपनिषद् 2.23, मुण्डकोपनिषद् 3.2.3.

43. निपाताद्यस्फुटं चिह्नं भक्तिरव्यभिचारिणी ।
तया शिष्यस्य सततमनिवारितवीर्यया ।
पुंसः प्रसन्नभावस्य शिवत्वं व्यक्तिमेति हि । तन्त्रालोकविवेके 27,28 उद्धृतं मतङ्गतन्त्रम्

44. भक्त्युद्रेकाद्विरक्तस्य यादृशी जायते मतिः ।
सा शक्तिः शाङ्करी नित्यं भावयेत्तां ततः शिवः ॥ विज्ञानभैरवे, 121

45. (i) तस्मात्समत्वं मूलन्तु व्रतानां परमं व्रतम् । तन्त्रालोकविवेके 12. 12
(ii) स्वपरस्थेषु भूतेषु जगत्यस्मिन्समानधीः । नेत्रतन्त्रे 8. 18

46. तन्त्रालोकविवेके (2.38) उद्धृतमन्यदपि पद्यममुमेवार्थं पुष्णाति–
स्वं कर्तव्यं किमपि कलयंल्लोक एष प्रयत्नान्
नो पारार्थ्यं प्रति घटयते काञ्चनस्वात्मवृत्तिम् ।
यस्तु ध्वस्ताखिलभवमलो भैरवीभावपूर्णः
कृत्यं तस्य स्फुटमिदमियल्लोककर्तव्यमात्रम् ॥

47. (i) सुतनु हृदयात्प्रत्यादेशव्यलीकमपेतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशंकया ॥ अभिज्ञानशाकुन्तलम् 7. 24
(ii) मोहान्मया सुतनु पूर्वमुपेक्षितस्ते । तत्रैव 7. 25
(iii) छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा । तत्रैव 7. 32

48. नान्दीमुखेन तस्य अष्टमूर्तिशिवरूपत्वं ध्वनितम् ।

49. उभयत्रापि स्वातन्त्र्यकर्तृत्वरूपं प्रभुत्वं च शक्तेरेवेत्यपि ध्वनितम्। तथा हि "अद्यप्रभृत्य-वनताङ्गि तवास्मि दासः" इति कुमारसम्भवस्य पञ्चमसर्गे, "भर्तर्यपेततमसि प्रभुता तवैव" इति शाकुन्तलस्य सप्तमाङ्के ।

अनुक्रमणी

ग्रन्थ-सूची

संस्कृतम्

ईश्वरप्रत्यभिज्ञाविमर्शिनी, अभिनवगुप्तः, सं., पाण्डेय, के. सी., प्रधान सं. द्विवेदी, आर. सी. मोतीलाल बनारसीदास, दिल्ली, 1986 ।

कर्मकाण्डक्रमावली, सोमशम्भु, सं. जे.डी. जादू, शोध-विभाग, श्रीनगर, 1947 ।

कामकलाविलासः, पुण्यानन्द, सं, मुकुन्दराम शास्त्री, शोध-विभाग, जम्मू एवं कश्मीर, 1918, अनु. आर्थर एवलॉन, मद्रास, 1953 ।

कुलार्णवतन्त्रम्, विद्यारत्न, तारानाथ (सं.), आर्थर एवलॉनकृत भूमिकासहित, मोतीलाल बनारसीदास, दिल्ली, 1975 ।

जन्ममरणविचारः, भट्ट, वामदेव, अमरौघानुशासन, गोरक्षनाथ तन्त्रवधानिकाः अभिनवगुप्त सं, मुकुन्दराम शास्त्री, शोध-विभाग, जम्मू एवं कश्मीर, 1918 ।

ज्ञानार्णवतन्त्रम्, ईश्वरप्रोक्तम्, आनन्दाश्रम, 1977 ।

तत्त्वप्रकाशः, भोजराज, सं, मिश्र, कामेश्वरनाथ, चौखम्बा ओरियन्टालिया, वाराणसी ।

तन्त्रसंग्रहः, त्रिपाठी, रामप्रसाद, भाग 3, चौखम्बा संस्कृत सीरीज, वाराणसी ।

तन्त्रसंग्रहः, द्विवेदी, ब्रजवल्लभ, भाग 4, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी 1981 ।

तन्त्रसारः, अभिनवगुप्त, अनु, पं. हेमेन्द्रनाथ चक्रवर्ती, वाराणसी ।

तन्त्रालोकः, जयरथकृतविवेकसहितः अभिनवगुप्त, भाग 1 से 12 सं. मधुसूदन कौल शास्त्री एवं मुकुन्दरामशास्त्री, 1918-38 ।

तन्त्रालोकः, अभिनवगुप्त, सं, द्विवेदी, आर.सी. एवं रस्तोगी, नवजीवन, भाग 1 से 8 मोतीलाल बनारसीदास, 1987।

तन्त्रालोकः, सं. कृष्णानन्द सागर (सर्वदर्शनाचार्य), भाग 1-4, चौखम्बा संस्कृत सीरीज।

त्रिपुरारहस्यम् (ज्ञानकाण्डम्), आंग्लानुवाद-ए, यू, वासवद, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, 1965।

देवीनामविलासः, साहिबकौल, सं. पं. मधुसूदन कौल शास्त्री, शोधविभाग, जम्मू एवं कश्मीर 1942।

देवीरहस्यम्, काक, रामचन्द्र एवं शास्त्री, हरभट्ट (सं.), बुटाला पब्लिकेशन्स, दिल्ली, 1985।

नित्याषोडशिकार्णवः, श्रीभास्कररायकृत सेतुबन्ध व्याख्यासहित, अभ्यंकर, काशीनाथ वासुदेव एवं जोशी गणेशशास्त्री अंबादास, आनन्दाश्रम संस्कृत ग्रन्थावली, ग्रन्थांक, 56, 1976 ।

नेत्रतन्त्रम्, श्रीक्षेमराजकृतम्, उद्योतसहित, द्विवेदी व्रजवल्लभ, परिमल पब्लिकेशन्स दिल्ली ।

परात्रिंशिका (लघुवृत्ति एवं विवृत्ति), अभिनवगुप्त, सं. जे.डी.जाडू शोध-विभाग, श्रीनगर, 1947 ।

प्रत्यभिज्ञाहृदयम्, क्षेमराज, अनु, जयदेवसिंह, मोतीलाल बनारसीदास, दिल्ली, 1973 ।

प्रपंचसारतन्त्रम्, सं., आर्थर एवलॉन, मोतीलाल बनारसीदास, 1981 ।

बृहन्नीलतन्त्रम्, कौलः मधुसूदनः (सं.), बुटाला एंड कंपनी, दिल्ली, 1984।

भगवद्गीता, राजानकरामकण्ठरचितसर्वतोभद्र-टीकासहिता, काश्मीर सीरीज ऑफ टेक्स्ट्स एंड स्टडीज, 64, श्रीनगर, 1943 ।

महाकालसंहिता (कामकला खण्ड एवं गुह्यकाली खण्ड 1-2), झा, किशोरनाथ (सं.), गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठ, इलाहाबाद, 1971-77 ।

महानिर्वाणतन्त्रम्, सं. आर्थर एवलॉन, मोतीलाल बनारसीदास, दिल्ली 1977 ।

महार्थमंजरी, परिमलसहिता, महेश्वरानन्द, सं. मुकुन्दराम शास्त्री, शोध-विभाग, जम्मू एवं कश्मीर, 1918 ।

महानयप्रकाशः, शितिकण्ठ, सं.. मुकुन्दराम शास्त्री, शोध-विभाग, जम्मू एवं कश्मीर 1918 ।

मातृकाभेदतन्त्रम्, सं. मैगी, मिकाइल, दिल्ली, 1989 ।

मालिनीविजयोत्तरतन्त्रम्, शास्त्री, पं. मधुसूदन कौल, बुटाला एंड कंपनी, दिल्ली, 1984 ।

मालिनीविजयवार्तिकम्, अभिनवगुप्त, सं. पं. मधुसूदन कौल शास्त्री, शोध-विभाग, जम्मू एवं कश्मीर 1921 ।

मृगेन्द्रतन्त्रम्, शास्त्री, पं. मधुसूदन कौल (सं.), मेहरचन्द लक्ष्मणदास, 1982 ।

मृगेन्द्रागमः (क्रियापाद एवं चर्यापाद), भट्ट नारायण काठरचित वृत्ति सहित, सं. एन. आर. भट्ट पाण्डिचेरी इन्स्टीट्युट फ्रेन्वाइज़ डी इन्डोलागी, 1962 ।

योगिनीहृदयम् (अमृतानन्दयोगीकृत "दीपिका" एवं भास्कररायकृत "सेतुबन्ध" सहित), कविराज, म.म.पं. गोपीनाथ (सं.), अनुसंधान संस्थान, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, 1979 ।

रुद्रयामलतन्त्रम्, त्रिपाठी, भागीरथप्रसाद, योगतन्त्र विभाग, वाराणसी , 1980 ।

लुप्तागमसंग्रहः, प्रथमभाग, कविराज, म.म.पं. गोपीनाथ, शोध-संस्थान, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी, 1970।

लुप्तागमसंग्रहः, द्वितीय भाग, द्विवेदी, पं. व्रजवल्लभ, शोध-संस्थान, संपूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, 1983।

लौगाक्षिगृह्यसूत्रम् (देवपालकृतभाष्यसहितम्) भाग 1-2, सं. पं. मधुसूदन कौल शास्त्री, शोध-विभाग, जम्मू एवं कश्मीर, श्रीनगर, 1928।

वामकेश्वरीमतम् (जयरथकृत विवरणसहित), शास्त्री, पं., मधुसूदन कौल (सं.), शोध-विभाग, जम्मू एवं कश्मीर, 1945।

विज्ञानभैरवः, द्विवेदी, व्रजवल्लभ, (सं.), मोतीलाल बनारसीदास, दिल्ली, 1984।

शारदातिलकतन्त्रम्, सं., आर्थर एवलॉन, मोतीलाल बनारसीदास, दिल्ली, 1982।

शिवदृष्टिः, उत्पलदेवकृतवृत्तिसहिता, सोमानन्दः सं. चतुवेर्दी, राधेश्याम, वाराणसेय संस्कृत संस्थान, वाराणसी, 1986।

शिवसूत्रविमर्शः, कौल जानकीनाथ, मोतीलाल बनारसीदास, दिल्ली, 1984।

श्रीमद्भगवतगीता, शंकरनारायण

श्रीपरात्रिंशिका, अभिनवगुप्तरचिता विवृतिसहिता, गुर्टू, नीलकण्ठ, मोतीलाल बनारसीदास, दिल्ली, 1985।

श्रीमद्भगवद्गीता, अभिनवगुप्तरचिता गीतार्थसंग्रहसहित, भाग 1-2, शंकरनारायण (सं.), श्रीवेंकटेश्वर विश्वविद्यालय, प्राच्यपरिशोधनालय, तिरुपति, 1985।

श्रीविद्यार्णवतन्त्रम्, शर्मा, भद्रशील (सं), कल्याण मन्दिर, अलोपीबाग मार्ग, प्रयाग।

सकलजननीस्तवः, यक्ष, दीनानाथ शास्त्री (सं.), जम्मू-कश्मीर राजकीय शोध-प्रकाशन विभाग, 1960।

स्तवचिन्तामणिः, क्षेमराजकृत टीकासहिता, भट्ट नारायण सं. म. म. पं. मुकुन्दराम शास्त्री, शोध-विभाग, श्रीनगर, 1918।

स्पन्दकारिका, भट्ट कल्लटाचार्यरचित वृत्तिसहिता, गुर्टू, नीलकण्ठ, मोतीलाल बनारसीदास, दिल्ली, 1981।

स्वच्छन्दतन्त्रम्, भाग 1-4, सं. पं. मधुसूदन कौल शास्त्री, संस्कृत ज्ञान संस्थान, दिल्ली, 1986।

स्वच्छन्दतन्त्रम्, भाग 1. 2, 3., सं. द्विवेदी, व्रजल्लभ, परिमल पब्लिकेशन्स, दिल्ली, 1985।

हठयोगप्रदीपिका, ब्रह्मानन्दरचितज्योत्स्नासहिता, अनु. एवं. सं. श्रीनिवास अयंगार, अड्यार पुस्तकालय, मद्रास, 1975।

हेवज्रतन्त्रम्, कन्हपादरचितयोगरत्नमालासहितम्, भाग 1-2, सं.. श्नेलग्रोव, डी. एल, आक्सफोर्ड यूनिवर्सिटी प्रेस, लंदन, 1980।

हिन्दी

आचार्य, श्रीराम शर्मा एवं गौतम, चमनलाल, तन्त्रविज्ञान, संस्कृत संस्थान, बरेली, 1974।

कविराज, म. म. पं. गोपीनाथः तान्त्रिक साहित्य, हिन्दी समिति, लखनऊ, 1972।

कविराज, म.म.पं. गोपीनाथ, तान्त्रिक वाङ्मय में शाक्तदृष्टि, बिहार राष्ट्रभाषा परिषद् पटना, 1978।

कविराज, म.म. पं. गोपीनाथ, भारतीय संस्कृति और साधना, भाग 1-2, बिहार राष्ट्रभाषा परिषद्, पटना, 1977।

कविराज, पं. गोपीनाथ, तन्त्र और आगम-शास्त्रों का दिग्दर्शन, बिहार राष्ट्रभाषा परिषद्, पटना, 1977।

कविराज, मं. मं. पं. गोपीनाथ, श्रीसाधना, विश्वविद्यालय प्रकाशन, वाराणसी, 1985।

काणे, पी.वी. धर्मशास्त्र का इतिहास, भाग 1-5, हिन्दी अनु. काश्यप, अर्जुन चौबे, उत्तरप्रदेश हिन्दी संस्थान लखनऊ।

घिल्डियाल, पं. देवीप्रसाद, पंचमकार तथा भावत्रय, कल्याण मन्दिर प्रकाशन, प्रयाग।

चौधरी. बीः शक्तिसाधना, चौखम्बा संस्कृत सीरीज, वाराणसी, 1963।

जोशी, भंवरलाल, काश्मीर शैवदर्शन और कामायनी, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, 1968।

त्रिपाठी, राममूर्ति, तन्त्र और सन्त, साहित्य सदन, इलाहाबाद, 1975।

त्रिपाठी, विन्ध्येश्वरीप्रसाद, भारतीयकर्मकाण्डस्वरूपाध्ययनम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, 1980।

द्विवेदी, कमला, तन्त्रालोक (आ. 4, 5, 6) का आलोचनात्मक अध्ययन (अप्रकाशित) शोधप्रबन्ध, उदयपुर विश्वविद्यालय, उदयपुर, 1976।

द्विवेदी, कमला परमार्थसार, मोतीलाल बनारसीदास दिल्ली।

द्विवेदी, रामचन्द्र काश्मीर की शैव परम्परा, नेशनल पब्लिशिंग हाउस, नयी दिल्ली, 1990।

द्विवेदी, व्रजवल्लभ, तन्त्रयात्रा, रत्ना पब्लिकेशन्स, वाराणसी, 1921।

द्विवेदी, हजारीप्रसाद, नाथ-सम्प्रदाय, हिन्दुस्तान एकेडेमी, उ. प्र. , इलाहाबाद, 1950।

मिश्र, जनार्दन, भारतीय प्रतीक विद्या, बिहार राष्ट्रभाषा-परिषद्, पटना, 1959।

मिश्र, रवीन्द्रनाथ, तन्त्रकला में प्रतीक, कला प्रकाशन, वाराणसी, 1987।

वर्मा, श्रीसांवलिया बिहारीलाल, भारत में प्रतीक (मूर्ति)-पूजा का आरंभ और विकास, बिहार हिन्दी ग्रन्थ अकादमी, पटना, 1974।
वात्स्यायन, कपिला, (सं.), कलातत्त्वकोश, मोतीलाल बनारसीदास, दिल्ली, 1988।
व्यास, सूर्यप्रकाश. बौद्ध वेदान्त एवं काश्मीर शैवदर्शन, विवेक पब्लिकेशन्स, अलीगढ़ 1986।
व्यास, सूर्यप्रकाश, सिद्धित्रयी, चौखम्भा संस्कृत संस्थान, वाराणसी 1989।
शर्मा, नीलकमल, प्राचीन भारत में शक्तिपूजा।
शास्त्री. पं.. देवदत्त, तन्त्रसिद्धान्त और साधना, स्मृति प्रकाशन, इलाहाबाद, 1982।
शास्त्री. डॉ. शिवशंकर अवस्थी, मन्त्र और मातृकाओं का रहस्य, चौखम्बा विद्याभवन, वाराणसी, 1966।
शास्त्री. बलजिन्नाथ, काश्मीर शैवदर्शन, रणवीर केन्द्रीय संस्कृत विद्यापीठ, जम्मू, 1973।
शुक्ल, कृष्णकान्त, शंकर और अभिनवगुप्त के परमतत्त्व की तुलनात्मक मीमांसा, दार्शनिक त्रैमासिक, वर्ष 15, अंक 2, अप्रैल, 1969।
सिंह, लल्लनप्रसाद, तन्त्र, आनन्दनगर, दिल्ली, 1976।

आंग्ली

Arthur Avalon. Tantra-Raj-Tantra. Ganesh and Company, Madras, 1952.
Arthur Avalon. The Serpant Power. Ganesh and Company, Madras, 1958.
Arthus Avalon. The Garland of letters. Ganesh and Company, Madras, 1963.
Authur Avalon. Introduction to Tantra Shastra. Ganesh and Company, Madras. 1963.
Sir John Woodroffe (Arthur Avalon), Principles of Trantra, Pt. I & II. Ganesh & Company, Madras. 1978.
Sir John Woodroffe. Sakti and Sakta. Ganesh & Company, Madras. 1975.
Authur Avalon. Tantrabhidhana. Canton Publisher, 1983.
Arya. Usharbudh, Mantra and Meditation. Pennsylvania, 1985.
Bagchi. P.C. Studies in the Tantras. Calcutta. 1939.
Bandyopadhyaya, Pranab, The Goddess of Tantra, Punthi Pustak, Calcutta. 1987.
Banjree. J.N. Religion in Art and Archaeology, University of Lucknow, Lucknow, 1968.
Banerji. Sures Chandra, Cultural Heritage of Kashmir, Sanskrit Pustak Bhandar, Calutta. 1965.
Basu. Manoranjan, Fundamentals of the Philosophy of Tantras. MLBD, Delhi.
Bharti Agehanand, Tantric Tradition, Rider and Company, London, 1965.
Bhattacharya, N.N. History of the Tantric Religion, Manohar Publications, New Delhi, 1982.
Bhattacharya. Narendra Nath, History of the Sakta Religion, Munshiram Manoharlal, New Delhi, 1974.

Blofeld, John, Mantras: Sacred Words of Power, London. George Allen & Unwin Ltd., 1977.

Bose. D.N. & Haldar. H., Tantras: Their Philosophy and Occult Secrets, Firma KLM, Calcutta, 1981.

Buhnemann. Gudeun: Pity: A Stud in Smarta Ritual, Vienna, 1988.

chakravarti. C., Interesting Developments in Vedic Rituals, Calcutta, Gopinath Kaviraj Abhinadan Granth, Lucknow.

Ghakravarti. Chintakaran: Tantras, Studies on their Religion and literature, Punthi Pustak. Calcutta, 1972.

Dendekar. R.N., C.G. Kashikar & others, Srautakosa: Encyclopacdia of Vedic Sacrficial Ritual, Poona.

Dange, S.A. Sexual Shmbolism from the Vedic Ritual, Ajanta Publications, Delhi, 1979.

Das, S.K. Sakti or Divine Power, Calcutta, 1934.

Datta. Bivhuti Bhusan: Science of the Sulba, a Study in early Hindu Geometry,1932.

David Kinsley: Hindu Goddesses. MLBD. Delhi, 1987.

de Kleen, T: Mudras, University Books, New York, 1970.

Douglas, N: Tantra Yoga, New Delhi, 1971.

Drury. Naama: The Scrificial Ritual in the Satapath Brahmana, MLBD, Delhi, 1981.

Dyezkowski, Mark, S. G.: The Canon of the Saivagama and the Kubjika tantras of the Westem Kaul Tradition New Delhi.

Frazer, Sir James George: The Golden Bough, a Study in Magic and Religión. Macmillan, London. 1907.

Gonda. J.: The Ritual Sutras. Wiesbaden, 1977.

Gonda. J.: Visnuism and Sivaism, Munshiram Manoharlal, New Delhi, 1976.

Goudriaan, Tenu: The Vinasikhatantra, MLBD, Delhi, 1985.

Goudrain, Tenu & Gupta, Sunjukta: Hindu Tantric and Sakta Literature, Otto Harrassowitz. Wiesbadan.

Guenther. Herbert. V.: Yuganaddha: The Tantric View of Life. Chowkhamba Sanskrit Series Office, Varanasi. 1976.

Hazra. R. C. : Puranic Records of Hindu Rites and Customs.

James. E. O. : Origins of the Sacrifice. Thames and Hudson. London, 1971.

James. E. O. : Sacrifice and Sacrament, Thames and Hudson. London, 1962.

Jash. Pranabananda: History of Saivaism, Roy and Chamdhary Calcutta, 1974.

Kaviraj. M. M. Gopinath: The Ascent According to Kaulika Outlook, Bharata Manisha, Vol. I-4, Jan, 1976.

Knight. Gareth: The Practice of Ritual Magic, Rev. Edn., New York.

Kumar, Pushpendra: Sakti Cult in Ancient India, Bhartiya Publishing House, Varanasi, 1974.

La Fontaine (J. S.) Ed. : Interpretation of Ritual: essays in honour of A. I. Richards. 1972.

Mishra, Kamalakar: Significance of the Tantric Tradition. Arddhanarisvara Publications. Varanasi, 1981.

Mukerjee, Ajit & Anand Mulkraj, Tantra Magic, New Delhi, 1977.

Mukerjee, Ajit: Tantra Asana, Ravi Kumar, New Delhi, 1971.

Mukerjee, Ajit & Khanna Madhu: The Tantrik Way, Vikas Publishing House. Delhi. 1977.

Mukerjee, Ajit : Ritual art of India, 1985.

Mukerjee, Ajit: Art Tantra, Kumar Gallary, New Delhi, 1966.

Murphy, Paule E: Triadic Mysticism, MLBD, Delhi, 1986.

Nagaswami. R. Sivabhakti, New Delhi, 1989.

Pal Pratapaditya: Hindu Religion and Iconology (According to the Tantrasara PVU), MLBD, Delhi.

Pandey, K. C. Abhinavagupta: An Historical and Philosophical Study, Ed., Chowkhambha Sanskrit Series Office, 1963.

Pandey, Rajbali, Hindu Samskaras. MLBD, Delhi, 1976.

Pandit B. N. Aspects of Kashmir Saivism. Utpala Publications, Kashmir. 1977.

Pandit. M. P. : More on Tantras, MLBD, Delhi.

Pandit. M. P. : Tantric Sadhana, I ed.: Bharatiya Jnapitha Publication, Lokadaya Granthamala 200, 1964.

Parimoo, B. N. : The Ascent of Self (A Reinterpretation of the Mystical Poetry of Lalla Ded., MLBD, Delhi.

Philip Rawson: The Art of Tantra, Vikas Publishing House, Delhi. 1973.

Potdar; K. R. Sacrifice in the Rigveda, 1953.

Pragna R. Shah: Tantra: Its Therapeutic Aspect, Punthi Pustak, Calcutta. 1987.

Raghavan. V.: Yantras or Mechanical Contrivances in Ancient India.

Rastogi, Navjeevan: Abhinavagupta's notion of Tantra in the Tantraloka, Indian Theosophist, 82 (10-11) 85. IV 85. Oct., No. 85. pp. 110-20.

Rastogi. Navjivan: The Krama Tantricism of Kashmir. Vol. I, MLBD, Delhi, 1979.

Rudrappa. J.: Kashmir Saivism. Prasaranga. University of Mysore, 1969.

Sastri. T. Ganapati: Isanasivagurudeva Paddhati of Isanasivagurudeva. Vol. I. II, III., Bharatiya Vidya Prakashan. 1988.

Sen, C.: Dictionary of Vedic Rituals (based on the Sruata and Grahya Suttras).

Seidenberg: The Ritul origin of the circle and square.

Sender. Henny: The Kashmiri Pandits: A Study of Cultural Choice in North India.

Sharma. LN.: Kashmir Shaivism, Bharatiya Vidya Prakashan. Varanasi. 1972.

Sharpe. E. J. : 'Sacrifice' Man, Myth and Magic, edited by Richard Cavendish. Purnell. London. 1970

Shivanand Radha: Mantras: Words of Power. MLBD, Delhi.

Singh, Jaideva: Siva Sutras: The Yoga of Supreme Identity, MLBD, Delhi, 1979.

Singh, Jaideva, Vijnana Bhairava or Divine Consciousness, MLBD, Delhi, 1981.

Singh, Jaideva: Spanda Karikas. MLBD, Delhi, 1980

Singh, Jaideva: Paratrisika Vivarana, MLBD, Delhi, 1988.

Singh, Lalan Prasad: Tantra: Its Mystic and Scientific basis, Concept Publishing Co. Delhi, 1976.

Sir John Woodroffe: See Arthur Avalon.

Sivananda. Swami: Sadhana, MLBD, Delhi,

Staal. Frits. AGNI : The Vedic Ritual of the Fire Altar, MLBD, Delhi, 1984.

Staal. F: The Meaninglessness of Riual. Nirman International, Review for the History of Religions. 1980.

Staal. F.: "Ritual Syntex in Sanskrit and Indian Studies". Festschift Ingalls Dordrecht, pp. 119-142, 1979.

Staal. J. F. : The Science of Ritual Poona. 1982.

Suryakanta; Tantric Diksa. ABORI, 35, 1954, pp. 10-19.

Svobode. Robert, E.: Aghora: At the left hand of God. New Mexico. 1986.

Ticci, G.: The Theory and practice of the Mandala. London. 1969.

Wadhawani Shah, Yashodhara: Şacrifical ritual and the Upanisads. ABORI 66 (1-4) 85. pp. 47-61.

[illegible] Kannadi Paddas: A Study of Cultural Change in Pench [illegible]

[illegible] Bhagavata, Vyasa Prakashan, [illegible] 1974.
[illegible] Myth and Ritual edited by Richard [illegible]
[illegible] 1970.
[illegible] Words [illegible] Delhi.
[illegible] Sutras, The Way [illegible] and the Prelim [illegible]

[illegible] Vidhana [illegible] of [illegible] 1970.

[illegible] Kandas, MLBD Delhi, 1980.
[illegible] Narayana [illegible] Delhi, 1986.
[illegible] Edited [illegible] Delhi, 1978.
[illegible] See Anand [illegible]
[illegible] 1966.
Staal, [illegible] the Vedic Ritual of the Fire Altar, MLBD, Delhi, 1984.
Staal, [illegible] the [illegible] Netherlands [illegible]
[illegible] of [illegible]
[illegible] British Sahitya Parishad and Indian Studies [illegible]
[illegible] 1979.
[illegible] the Science of Ritual [illegible] 1982.
[illegible] 1956, pp. 10-19.
[illegible] of the [illegible] Motilal, 1980.
[illegible] of [illegible] 1956.
[illegible] MLBD, Delhi, [illegible]

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय